CC-O. In Public Domain. Digitized by eGangotri

विद्या गाइड

मेघदतादर्शः

(पूर्वमेघः)

लेखक :-

डा० त्रिलोकीनाथ द्विवेदी

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मेघदूतादर्शः

[प्रश्नोत्तरी]

सम्पादक :

डॉ० त्रिलोकीनाथ द्विवेदी

भारतीय विद्या प्रकाशन

Sri Vidyabharathi Book Centre, Sringeri

वाराणसी • दिल्ली

© भारतीय विद्या प्रकाशन
CC-0.In Public Domain. Digitized by eGangotri

(१) पो० बा० नं० ११०८, कचौड़ीगली वाराणसी–२२१००१
(२) १ यू० बी० जवाहर नगर बँगलो रोड दिल्ली–११०००७

प्रथम संस्करण : १९८५

द्वितीय संस्करण : १९८६

तृतीय " : १९९३

चतुर्थ " : १९९९।

Sri Vidyabharathi Book Centre, Sringeri

विषयसूची

CC-O. In Public Domain. Digitized by eGangotri

१. मेघदूतस्य मार्गवर्णनम् यद्वा पूर्वमेघस्य कथासारांशः ५
२. मेघदूतस्य वैशिष्ट्यम् यद्वा संस्कृतसाहित्ये मेघदूतस्य स्थानम् ६
३. मेघदूते प्रकृतिचित्रणम् ८
४. मेघदूते उपमाविधानं सादृश्यविधानम् वा ११
५. मेघदूते वियोगवर्णनम् (अङ्गीरसः) १३

सूक्ति व्याख्या

१. मेघालोके भवति १५
२. कामार्ता हि १७
३. याच्ञा मोघा १
४. कः सन्नद्धे १७
५. आशाबन्धः १८
६. न क्षुद्रोऽपि १८
७. रिक्तः सर्वो १९
८. स्त्रीणामाद्यं १९
९. मन्दायन्ते न २०
१०. शालास्वादो विवृतजघनां २०
११. आपन्नार्तिप्रशमनफला २०
१२. के वा न स्युः २०

श्लोकानुक्रम

१. अप्यन्यस्मिन्जलधर ! २४
२. आपृच्छस्व प्रियसखम् ७
३. कश्चित्कान्ताविरहगुरुणा १
४. कर्तुं यच्च प्रभवति २३
५. गच्छन्तीनां रमणवसतिं १६
६. गम्भीरायाः पयसि १६
७. जातं वंशे भुवनविदिते ४

CC-O. Jagadguru Kripalu Parishat Vidyabharathi Book Centre, Sringeri.

CC-O. In Public Domain. Digitized by eGangotri

८. तत्र स्कन्दम्	१८
९. तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः	२
१०. तस्य स्थित्वा कथमपि	२
११. तस्यास्तिक्तैर्वनगजमदैर्वासितं	११
१२. तस्याः किञ्चित्करधृतनिव	१७
१३. तस्याः पातुं सुरगज इव	१९
१४. तस्योत्सङ्गे प्रणयिन	२१
१५. तां कस्यांचिद्	२५
१६. तां चावश्यं	६
१७. त्वामारूढम्	२२
१८. त्वामासारप्रशमितवनोपप्लवं	१०
१९. त्वय्यादातुं जलमवनते	१९
२०. त्वय्यायत्तं कृषिफलमिति	९
२१. तेषां दिक्षु	१३
२२. दीर्घीकुर्वन्पटु मदकलं	१४
२३. धूमज्योतिःसलिलमरुतां	३
२४. नीपं दृष्ट्वा हरितकपिशं	१२
२५. पादन्यासैः क्वणितरशनास्तत्र	१५
२६. ब्रह्मावर्तं जनपदम्	२५
२७. मन्दं मन्दं नुदति	५
२८. मार्गं तावच्छृणु	८
२९. रत्नच्छायाव्यतिकर	८
३०. वक्रः पन्था यदपि	१३
३१. वीचिक्षोभस्तनित	२३
३२. संतानां त्वमसि शरणं	५
३३. स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे	११
३४. हेमाम्भोजप्रसवि सलिलं	२०

Sri Vidyabharathi Book Centre, Sringeri

—:: ० ::—

CC-O. In Public Domain. Digitized by eGangotri

मेघदूतस्य मार्गवर्णनम् यद्वा

पूर्वमेघस्य कथासारांशः

सम्पूर्णस्य मेघदूतस्य कथानकं भागद्वये विभक्तमस्ति—मार्गवर्णनम्, अलकावर्णनं सन्देशवर्णनञ्चेति । यथोक्तं पूर्वभागे सन्देशं नेतुं मेघं प्रार्थयित्वा तत्प्रशंसां च कृत्वा यक्षेन—

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ॥

अत्र नहि केवलं सन्देश एव श्रोत्रपेयोऽस्ति, अपितु मार्गवर्णनमपि श्रोत्रपेयं वर्तते । तत्र पूर्वमेघे मार्गवर्णनमस्ति उत्तरमेघे च प्रथममलकायाः वर्णनमस्ति पश्चाच्च सन्देशस्य—

मार्गवर्णने रामगिर्याश्रमस्थो यक्षो रामगिरितोऽलकां यावन्मार्गस्य वर्णनं तत्रत्यानां विशिष्टस्थानानां तद्वैशिष्ट्यानां च वर्णनं करोति । प्रथमं रामगिरिरेव यात्रार्थं प्रष्टव्योऽस्ति । ततश्च सरसनिचुलप्रदेशाद् यात्रां प्रारभ्य उत्तरां दिशं गन्तुं परामृशति मेघं यक्षः यात्राविन्दुतः किञ्चिद्दूरे एव वालूरस्थानमस्ति यत्रेन्द्रस्य धनुःखण्डमुदेति । ततो शालदेशोऽस्ति यत्रत्याः जनपदवध्वः सरलाः कटाक्षरहिता अपि प्रेम्णा मेघं पश्यन्ति । ततश्च आम्रकूटपर्वतो मिलिष्यति यः खलु परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः सन् पृथिव्याः स्तन इव शोभां धारयति ।

आम्रकूटपर्वतमुल्लङ्घ्य गते सति रेवा नदी मार्गे पतिष्यति या विन्ध्यपादे तथैव शोभां धारयति यथा कृष्णस्य गजस्याङ्गे भक्तिच्छेदैः विरचिता भूतिः । ततश्च परिणतफलश्यामजम्बूवनान्तो दशार्णदेशः आगमिष्यति । तेषु एव दिक्षु विदिशा दशार्णदेशानां राजधान्यस्ति या वेत्रवत्या परिगता वर्तते । तत्रैव नीचैर्नामको गिरिरस्ति यत्र शिलावेश्मसु स्वेच्छया विहरन्ति नायकैः सह वेश्याङ्गनाः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

नीचैः पर्वतो नाम नदी यत्र याति उज्जयिनी नामक्यस्ति यत्रत्यानां नायिकानां भ्रूविलासः प्रसिद्धोऽस्ति तत्रास्त्येका नदी निर्विन्ध्या नाम। निर्विन्ध्याभुक्तीर्यैव श्रीविशाला विशाला पुरी उज्जयिनी गन्तव्या भवति। उज्जयिनी शिप्रानदीपरिगता वर्तते। उज्जयिन्यां भगवतो महाकालेश्वरस्य पुण्यं धाम वर्तते यत्र प्रजासमये वेश्या एव चामरं व्यञ्जयन्ति।

ततोऽग्रे किञ्चिदिव मार्गे गते सति गम्भीरा नदी वर्तते ततो देवगिरिरस्ति यत्र स्कन्दस्य वासोऽस्ति। स्कन्दनिवासतो देवगिरितः किञ्चिददूरे चर्मण्वती नदी वर्तते या रन्तिदेवस्य कीर्तिरूपेण प्रवहति। ततोऽग्रे गते सति दशपुरदेशोऽस्ति तत्रैव ब्रह्मावर्तो जनपदः कुरुक्षेत्रञ्चास्ति। कुरुक्षेत्रे सरस्वती नदी प्रवहति। ततश्च कनखलनामकं स्थानमस्ति यत्र गंगा प्रवहति। कनखलतोऽग्रे हिमालयो भविष्यति, हिमालयस्यैकदेशे कैलासो वर्तते यत्र निवसति भगवान् शङ्करः पार्वतीसहितः। तत्रैव हंसद्वारमस्ति क्रौञ्चरन्ध्रं नाम येन पथा राजहंसा मानसरोवरं गच्छन्ति।

ततः उत्तरां दिशं प्रति गते सति कैलासस्योत्सङ्गे अलका नाम नगरी वर्तते यत्र केवलं यक्षेश्वराः निवसन्ति। सैव च मेघस्य गन्तव्योऽस्ति।

अनेन मार्गवर्णनेन कविताविलासस्य महाकवेः कालिदासस्य भौगोलिकं ज्ञानं ज्ञायते।

मेघदूतस्य वैशिष्ट्यम् यद्वा संस्कृतसाहित्ये मेघदूतस्य स्थानम्

मेघदूतमस्त्येकं खण्डकाव्यम्—'खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि चेत्' इति लक्षणात्। रमणीयार्थप्रतिपादकत्वेन सहृदयाह्लादकस्य काव्यस्य नैकविधास्वन्यतमा विधाऽस्ति दूतकाव्यमिति। दूतकाव्यस्य बीजं रामायणे आदिकविना वाल्मीकिना तदोप्तं यदा भगवता रामचन्द्रेण प्रदत्तमङ्गुलीयकमादाय कर्तुमकर्तुमन्यथाकर्तुं तर्वथा समर्थो हनुमान् दुष्करमब्धिं समुत्तीर्य सरस्वदङ्कां लङ्कां गत्वा सीतां रामसन्देशं श्रावयामास। रामायणे उप्तं दूतकाव्यबीजं योगिनीमहात्म्यादिषु लतारूपेण परिणता सती मेघदूते पुष्परूपेण विकसिता जाता। एवं मेघदूतं दूतकाव्यपरम्पराम् वर्तकमिति यद्वा मेघदूतं नाम प्रथमं दूतकाव्यरत्नमिति नास्ति सन्देहः।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

मेघदूतस्य कस्यचित् श्लोकस्य व्याख्यातस्तन्मितमहिम्नस्तथा रामगिर्याश्रमस्थस्य कस्यचिद् यक्षस्य मेघमुखेन स्वजीवितसर्वस्वभूतां प्रियतमां प्रति कृतं प्रणयनिवेदनमस्ति । एवं मेघदूतस्य प्रत्येकमपि पद्यं किञ्चिदनिर्वचनीयरूपेण सरसमस्ति अस्याः सरसता 'बिन्दौ सिन्धुः' इति लोकोक्ति सर्वथा स्मारयति । मेघदूतस्य प्रत्येकस्मिन् श्लोके कस्यचिन्महाकाव्यस्य रसपरिपाकतामधिगच्छति काव्यभावनापरिपक्वहृदया सहृदयाः ।

अत्र विप्रलम्भशृङ्गारोऽङ्गी रसोऽस्ति । विप्रलम्भस्य तीव्रतमः उद्वेगो मेघदूतस्य प्रत्येकस्मिन् श्लोके दृश्यते उदाहरणरूपेणैक एव श्लोकः उदाह्रियते यत्र यक्षः स्वप्राणान् धारयन् स्वकीयां प्रेयसीं प्राणान् धारयितुमुपदिशति—

नन्वात्मानं बहुविगणयन्नात्मनैवावलम्बे
तत्कल्याणि ! त्वमपि नितरां मागमः कातरत्वम् ।
कास्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥

विप्रलम्भशृङ्गारत्वेऽपि कविताविलासेन रससिद्धेन महाकविना कालिदासेन संयोगशृङ्गारस्यापि प्रत्यक्षतो विपुला साम्यगुपस्थापिताऽस्ति । मेघस्य निर्विन्ध्यादिभिः नदीभिः सह संयोगं वर्णयित्वा—

(१) निर्विन्ध्यायाः पथि भव रसाव्यन्तरः सन्निपत्य ।
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो प्रियेषु ।

(२) कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ।

(३) ज्ञातस्वादो विवृतजघनां को विहातुं समर्थः ।

इत्यादिषु को नानुभवति संभोगशृङ्गारसास्वादम् । वननदीपर्वतादिवर्णनेन महाकालेश्वर-स्कन्द-शङ्कर-पार्वतीवर्णनेन च भावव्वनेरपि प्रभूततरा सामग्री प्रतिपादिताऽस्ति । एवं काव्यात्मपक्षमादाय मेघदूतस्य किञ्चिदपि काव्यं-महाकाव्यं वा प्रतिस्पर्धि नास्ति ।

काव्याङ्गपक्षमादाय कृते विचारे पार्वतीपरमेश्वरसम्पृक्तत्वेन शब्दार्थसाहित्ये प्राप्तयशःसागरेण महाकविना मेघदूते अर्थानुसारिणीं कोमलकान्तपदावलीशैय्यां निर्माय सर्वथा चमत्कृतं हृदयं सहृदयानाम् । ध्वन्यालोके—

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ काव्येषु महाकवेः ॥

Sri Vidyabharathi Book Centre, Srinagar

CC-0. In Public Domain. Digitized by eGangotri

इति प्रतिपादिता शब्दार्थसरणी मेघदूते सर्वत्र प्रतिपादिता दृश्यते। यथा मेघशब्दस्य कियत्यभिव्यञ्जनाऽस्तीति सहृदयाः प्रमाणम्। मेहति वर्षति, वर्षणेन आतपपरिहारं करोतीति व्युत्पत्तिधारकं मेघं दूतं विधाय मेघदूतद्वारा भौतिकवाशघर्मसन्तप्तानां जनानां छायाप्रदानं कृत्वा कामनावर्षणं कृतमस्ति। सुकुमारो मार्गः, वैदर्भी रीतिः, माधुर्यं प्रसादो वा गुणः सर्वथाऽत्रर्जयति मनांसि काव्यरसरसिकानां पाठकानाम्। अत्रत्योपमोत्प्रेक्षाकाव्यलिङ्गाद्यलङ्काराः अपरिहार्याङ्गत्वेन प्रतिपादिताः सन्ति। अर्थान्तरन्यासस्तु किमपि विशिष्यमेव वैशिष्ट्यं स्थापयति सहृदयानां हृदये।

एवं स्वकीयकाव्यगुणैः नूतनविधा प्रवर्तकत्वेन च मेघदूतस्य किमपि विशिष्टमेव स्थानं वरीवर्ति संस्कृतसाहित्ये इति नास्ति सन्देहः।

मेघदूते प्रकृतिचित्रणम्

लोकोत्तरवर्णनानिपुणकविकर्मभूते काव्ये रमणीयतामाधातुं कविसमयत्वेन बहूनि तत्त्वानि निर्धारितानि सन्ति काव्याभावनापरिपक्वहृदयैः काव्यशास्त्रिभिः। यदुक्तमस्ति महाकाव्यलक्षणप्रस्तावे—

सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः॥

इत्यादि एवं काव्यस्य यैव विधा भवतु महाकाव्यं वा खण्डकाव्यं वा सर्वत्राऽवश्यकतानुसारं स्वकीये काव्ये चमत्कारप्रतिपादनायैतेषु केषाञ्चित् सर्वेषां वा वर्णनं करोति कविः। एवं काव्येऽवश्यं प्रतिपाद्येषु काव्यतत्त्वेष्वन्यतममस्ति प्रकृतिचित्रणम्।

कविसमयभूतं प्रकृतिवर्णनं तु प्रायः सर्वैरेव कविभिः क्रियते किन्तु कविताविलासस्य महाकवेः कालिदासस्य काव्येषु प्रकृतिः पात्रवदाचरिता। मेघदूतमप्यस्त्येकं प्रकृतिप्रधानं खण्डकाव्यम्—इति नास्ति सन्देहः। मेघदूते तु प्रारम्भतोऽन्तं यावत् प्रकृतिवर्णनमेवास्ति। यदि यक्षेन प्रदत्तं सन्देशवाक्यं मेघदूतकाव्यम् पृथक्-क्रियेत्तदा प्रकृतिवर्णनातिरिक्तं किमप्यन्यत्तत्र न स्यात्। प्रकृतिवर्णने सन्देशवाक्यं तथाऽस्ति यथा व्यञ्जने लक्षणं भवेत् अर्थाद्यथा व्यञ्जनस्याधिक्यं लवणस्य च न्यूनता भवति तथैव मेघदूते सन्देशवाक्यं तु अतीवस्वल्पमस्ति, आधिक्यं तु प्रकृतिवर्णनस्यैवास्ति।

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

मेघदूते प्रकृतेः रूपद्वयमस्ति—उद्दीपनम्, आलम्बनञ्चेति। उद्दीपनात्मिकायाः प्रकृतेः प्रतिनिधिरस्ति मेघः। आलम्बनात्मिकायाः प्रकृतेः आधाररूपेण वन-पर्वतनद्यादयः सन्ति। यद्यपि मेघः सामान्यरूपेण—

'धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः'

इति धूमज्योतिः सलिलमरुतां सन्निपातः एवास्ति, तथापि मेघदूते मेघो वियोगोद्दीपकत्वेनास्ति वर्णितः—

मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।

यद्यपि स यक्षो अष्टौ मासान् तत्रातिवाहितवान् किन्तु आषाढस्य प्रथम-दिवसे यदा पर्वतसानुश्लिष्टं मेघं ददर्श तदा तत्प्रियाविरहदुःखं नमधिक-मुद्दीप्तं जातम्, तथा कौतुकाधानहेतोः कथमपि तस्य पुरः किञ्चित्कालं स्थित्वापि अन्तर्बाष्पो ययौ। यक्षस्य मनस्येवं जातं यत् यथाऽयं मेघो मामु-द्दीपयति तथैव यदि मम प्रियामप्युद्दीपयेत्तदाऽवश्यमेव सा न भविष्यतीति दयिता जीवितालम्बनार्थी सन् प्रियां प्रति स्वकुशलसमाचारं यद्वा तदाश्वासन-वचनं प्रेषयितुं तथा उत्सुकः सञ्जातो यथा चेतना चेतनविवेके कृपणो जातः, सन्देशार्थञ्च मेघं याचितवान्—'सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य'। इति यदि मेघो न स्यात् तदा यक्षवियोगोद्दीपनम्, सन्देशार्थं निवेदनम्, मेघ-स्य दौत्यं किमपि न स्यात्, न च स्यात्—इदं मेघदूतमिति मेघदूतं नाम मेघस्योद्दीपनविलास एव।

उत्तरमेघे तु उद्दीपनरूपेण प्रकृतेःप्रभूततरा सामग्री वर्तते—चन्द्रिका, तथा कल्पप्रसून-कमल-कुन्द-लोध्र-कुरवक-शिरीष-नीपादीनी पुष्पाणि उद्दीपनरूपेण प्रकृतेः प्रातिनिध्यं कुर्वन्ति। अलकानगरी सततं शङ्करशिरःस्थितचन्द्रचन्द्रिका चमत्कृतास्ति—

"बाह्योद्यानस्थितहरशिरश्चन्द्रिकाद्यौतहर्म्या"

चन्द्रिका वियोगिनां विषागार एव भवतीति सर्वथा प्रसिद्धमस्ति। अलका वधूनां कृते—

हस्ते लीलाकमलमलके बालमुकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्॥

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

© Digitized by eGangotri

इत्येकैकमपि विधिप्रपञ्चमाश्रित्य [illegible] गृहाङ्गणे एव मरकतबद्ध- सोपानमार्गा वापी वर्तते तत्तीरे च वर्षामेघप्रियो मयूरो नृत्यति। तत्र कुरबककृतेः माधवीलतामण्डपस्य समीपे वर्तमानो रक्ताशोकः कान्तः केसरश्चापि किमप्यधिकमेवोद्दीपकता सम्पादयतः।

पूर्वमेघेऽपि बलाकयाः गर्भाधानक्षणपरिचयात् मेघप्रियाः सन्ति, सारसपङ्क्तयः, राजहंसा वा पक्षिणः कुटज-कदम्ब-नीपादीनि पुष्पाणि जम्बूदुम्बराआदिवृक्षाः इन्द्रधनुश्चेति प्रभूततरा सामग्री वर्णिता या प्रकृतिस्वरूपं तत्त्वतः उपस्थापयति।

मेघदूतप्रतिपादिताऽऽलम्बनात्मिकायाः प्रकृतेः स्थाने नद्यः सन्ति। रेवा-वेत्रवती-निर्विन्ध्या-शिप्रा-गम्भीरा-चर्मण्वती-गङ्गादिनद्यो वर्णिता सन्ति मेघदूते एतासु नदीषु निर्विन्ध्या-गम्भीरादिभिः सह मेघस्य तथैव सम्बन्धो वर्णितोऽस्ति यथा नायिकाभिः सह नाटकस्य भवति। मेघो वेत्रवतीपयस्तथैव पिबति यथा कश्चिन्नायकः कश्याश्चित् नायिकायाः सभ्रूभङ्गं मुखं पिबति, कामुकयावस्थाविकलं फलं च प्राप्नोतीति—

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि॥

निर्विन्ध्या तु मेघं दृष्ट्वा तथा भवति यथा विहगकूजनत्वेन शब्दायमानं काञ्चीगुणं धारयति, मदस्खलनेन शनैः शनैः गच्छति, आवर्तरूपेण नाभिप्रदर्शनं करोति—

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥

मेघदर्शने गम्भीरायाः रागात् कटिभागतो वस्त्रस्रंसनं जायते, वानीरशाखा-भुजायां कथं कथमपि धारयितुं कृतप्रयत्नापि निष्फला सती विवृतजघना भवति या दृष्ट्वा मेघस्ततोऽग्रे कथं कथमपि गच्छति—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधो नितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥

एवं प्रकृतेः प्रतिनिधिभूताः नद्यो मेघस्य नायकस्यालम्बनविभावत्वेन प्रतिपादिताः सन्ति । अतो मेघदूते प्रकृतेः आलम्बनोद्दीपनयोः उभयोः रूपयोः सफलं चित्रणमस्ति ।

मेघदूते उपमाविधानं सादृश्यविधानं च

पुरुषार्थचतुष्टयसम्पादकेषु काव्येषु वेदादिशास्त्रविलक्षणतासम्पादकं सरसत्वमेवास्तीति प्रत्यक्षमेवास्ति प्रतिभाजुषां काव्यभावनापरिपक्वहृदयानां सहृदयनाम् । रसोऽस्ति काव्यस्यात्मा काव्येऽङ्गीति; रसं सर्वथा पोषयति कविः कृपणेन धनं यथा । काव्ये चमत्काराधानाय बहुविधं प्रयत्नते कविः । अतः केषाञ्चित् काव्येषु उपमा, केषांञ्चित् अर्थगौरवम्, केषाञ्चित् काव्येषु पदलालित्यम्, केषाञ्चित् काव्येषु सर्वेषां समवायो वा भवति—इति उपमाविषये कवितविलासो महाकविः कालिदास एवं प्रसिद्धः—उपमा कालिदास्य इति ।

महाकविः कालिदासो भारतीयसंस्कृतेः पोषकोऽस्तीति भारतीयदर्शनस्य प्रभावोऽस्य काव्येषु पूर्णरूपेषण द्रष्टुं शक्यते । भारतीयजनस्य वैशिष्ट्यमस्ति—अचेतने चेतनत्वम्—'सर्वं विष्णुमयं जगत्' इति । एवमचेतने चेतनत्वम्, चेतनेऽचेतनत्वं मेघदूतस्यापि प्रथमं वैशिष्ट्यमस्ति—प्रकृतिकृपणाश्चेताचेतनेषु' । स्वकाव्यसर्वस्वभूतामुपमामपि कविः पुरुषार्थचतुष्टय इव प्रकारचतुष्टयेन

(१) सजीवस्य सजीवेनोपमा
(२) सजीवस्य निर्जीवेनोपा
(३) निर्जीवस्य सजीवेनोपमा
(४) निर्जीवस्य निर्जीवेनोपमा

इति वर्गीकरणं स्वतः एवाग्रे प्रदर्शितः उपमाविधानैः सुस्पष्टता यास्यति—

उपमासम्पादकः कविः प्रभावात् Bharatiya Digital Library Collection. कृष्णकृष्णस्य मेघस्योपमां वप्रक्रीडापरिणतेन गजेन सम्पादयति—

CC-O. In Public Domain. Digitized by eGangotri

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।

कदाचित् आखण्डलधनुःखण्डप्रभासमन्वितो मेघो स्फुरितरुचिना चित्र-विचित्रेण वर्हेण गोपवेषस्य भगवतो विष्णोः सादृश्यं धारति—

येन श्यामं वपुरतितरां कान्तिमापत्स्यते
वर्हेणेव स्फुरितरुचिना गोपवेषस्यविष्णोः ।

परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः आम्रकूटपर्वतःशिखरं कृष्णवर्णे मेघे आरूढे सति पृथिव्याः नायिका स्तन इव शोभां धारयति यो मध्ये श्यामः शेषविस्तारे च पाण्डुवर्णो भवति—

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णैः ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥

हरितहरिते वननिकुञ्जाच्छादिते विन्ध्यपादे विशीर्णा स्वच्छजला रेवा भक्तिच्छेदैः गजस्याङ्गे विरचिता भूतिरिव प्रतीयते—

रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णा
भक्तिच्छेदैरिव विरचिता भूतिमङ्गे गजस्य ।

उज्जयिन्यां शिप्रावातः स्त्रीणां सुरतग्लानिं तथैव हरति यथा प्रियतम-चाटुकारः—

शिप्रावतः प्रियतम इव प्रार्थनाचाटुकारः ।

वेत्रवत्याश्चलोर्मि पयः सभ्रूभङ्गं नादिकामुखमिवास्ति—

सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ।

गम्भीरायाः पयस्तथैव प्रसन्नमस्ति यथा उदारहृदयस्य कस्यापि चेतो भवति तथा तत्र जायमानानि चटुलशफरोद्वर्तनानि कुमुदविशदानि सन्ति—

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मा ते प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्या कुमुदविशदान्यर्हसि त्वं धैर्या-
न्मोघीकर्तुं चटुलशफरोवर्तन प्रेक्षितानि ॥

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

कदाचिद् भ्रमरयुक्तानि कुन्दपुष्पाणि श्वेतकृष्णनेत्रकनीनिकायुक्तानां स्त्रीणां साम्यतां यान्ति । मेघस्य जलवर्षा कुरुक्षेत्रेऽर्जुनेन सम्पादिता नृपमुखवर्षायाः—'धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि, श्वेतश्वेतस्य हिमालयस्य शिखरमासाद्य कृष्णवर्णो मेघस्तथा दृश्यते यथा विषाणलीनपङ्कस्निग्धनयनवृषः—

शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ।

शुभ्रशुभ्रो हिमालयस्त्र्यम्बकस्य भगवतो शङ्करस्याट्टहासराशिरिवास्ति—'राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः' ।

रूपकालङ्कारमाध्यमेन गङ्गायाः शाटिकायाः अलकायाः नायिकया हिमालस्य कैलासस्य वा नायकेनोपमा कियत् चमत्कारमापादयतीति सहृदयाः प्रमाणम्—

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलाम् ।

वियोगग्लपिता यक्षिण शिशिरग्लपिता पद्मिनीव व्यथयति मनांसि रसिकानाम्—

जातां मन्ये शिशिरमथितां पद्मिनीवान्यरूपाम्

औत्सुक्येन चन्द्रकिरणं पश्यन्ती तथा चोद्दीप्तवियोगेन नेत्रे सङ्कोचयन्ती यक्षिणी साभ्रेऽह्नि स्थलकमलिनीव न प्रबुद्धा न सुप्ता दृश्यते ।

साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ।

एवं ज्ञायते यन्मेघदूते कालिदासीयोपमा किमप्यनिर्वचनीयमेव चमत्कारमापादयति येनाह्लादितै आलोचनोपलोचनैः आलोचकैः एकस्वरेण स्वीकृतोऽस्ति तदुपमाचमत्कारः—

उपमा कालिदासस्य इति ।

मेघदूते वियोगवर्णनम् (अङ्गीरसः)

मेघदूतं खण्डकाव्यमस्ति । खण्डकाव्यं महाकाव्यस्यैकदेशानुसारि भवति । यथोक्तं दर्पणे—

खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि चेत् ।

अर्थात् महाकाव्ये सम्पूर्णस्य जीवनवृत्तान्तस्य वर्णनं भवति किन्तु सम्पूर्ण जीवनवृत्तमपहायैकदेशस्य कस्याश्चिद् विशिष्टायाः वा घटनायाः यत्र वर्णनं क्रियते तत् खण्डकाव्यं भवति । मेघदूते यक्षजीवनस्यैका घटना स्वाधिकार-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रमत्तता तत्फलरूपेण च स्वामिनः शापात् देशनिर्वासनं वर्ष यावद्भियाविप्रयोगश्चेति मेघदूते वर्णितोऽस्ति यद्वा प्रियाविप्रयुक्तेन यक्षेण रामगिर्याश्रमस्थेन प्रियां प्रति मेघद्वारा सन्देशः प्रेष्यते । अतोऽस्ति मेघदूतस्य खण्डकाव्यत्वम् । महाकाव्यस्य कृते—

शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते

इति व्यवस्था वर्तते किन्तु खण्डकाव्यस्य कृतेऽङ्गिनो रसस्य व्यवस्था नास्ति व्यवस्थापिता महाकाव्यानुसारमेव रससिद्धकवीश्वरेण कविताविलासेन कालिदासेन मेघदूते विप्रलम्भशृङ्गारो "रसोऽङ्गीत्वेन प्रतिपादितोऽस्ति । आचार्येण दण्डिना तु खण्डकाव्यन्याय्यस्य मेघदूतस्य महाकाव्यत्वमेव प्रतिपादितमिति सर्वथौचित्यं शृङ्गारापेक्षया विप्रलम्भे चित्तद्रुतेराधिक्यादेव—

शृङ्गारे करुणे विप्रलम्भे च प्रकर्षवत्

स्वकीयकाव्यशिरोमणावस्मिन् मेघदूते विप्रलम्भ एव रसो अङ्गी सम्भोगो भावध्वनिश्च अङ्गभूताविति ।

मेघदूतमेकं प्रणयनिवेदनमस्ति । स्वामिनः कुबेरस्य वर्षभोग्यप्रियाविप्रयोगरूपशापान्निर्वासितोऽलकां परित्यज्य रामगिर्याश्रमेषु निवसन् कश्चिद् यक्षः आषाढस्य प्रथमदिवसे पर्वतसानुश्लिष्टं वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं दर्शं दर्शं पूर्वं तु हर्षप्रकर्षमनुभवन् कौतुकाधानहेतोः तस्य पुरः किञ्चित्कालं यावत्, स्थित्वा अन्तर्वाष्पं धारयित्वा खिन्नः खिन्नः सन् प्रियाप्राणत्राणहेतो प्रियासन्देशं प्रेषयितुं याचनां कृतवान् । स्वहृदयस्थितं सर्वमपि भावं मेघं पुरस्कृत्य श्रापितवान् ।

यक्षिणी साक्षाच्छरीरभूतैवास्ति विप्रलम्भस्य । यक्षस्य वियोगेन दह्यमाना भवनमलंकारमपि न करोति, यथा सूर्यं विना कमलं न पुष्यति तथैव यक्षं विना तस्य गृहस्यापि शोभा नास्ति तत् क्षामच्छायमस्ति —

क्षामच्छायं भवनमधुना मद्वियोगेन नूनम् ।
सूर्याभावे न खलु कमलं पुष्यति तां न शोभाम् ॥

यक्षस्य वियोगेन यक्षिणी स्वसखीभिः सह समधिकां कथामपि न करोति कथं कथञ्चित् स्तोकं भाषते । तस्य दिवसा अपि गुरवः सञ्जाताः सन्ति, विद्योतिनी यक्षिणी सम्प्रति तथैवास्ति यथा रात्रौ चक्रवाकेन वियुक्ता चक्रवाकी । वियोगेन म्लपितायास्तस्याः उपमारूपेण शिशिरमथिता पद्मिन्येव उपस्थापयितुं शक्यते—

Sri Vidyabharathi Book Centre, Sringeri

जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरूपाम् ।

CC-O. In Public Domain. Digitized by eGangotri

वियोगेन सा निरन्तरं रोदीति । रोदनेन तस्या नेत्रे उच्छूने स्तः, अशिशिरतरेण च निःश्वासेनाधरस्य वर्णो भिन्नः सञ्जातोऽस्ति, केशसंस्कारमपि न करोति । अतो मेघानुसरणेन यथेन्दुर्दीनो भवति तथैव यक्षेण विना यक्षिणी दैन्यमनुभवति—

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तैर्बिभर्ति ॥

प्रारब्धगीतायास्तस्या उत्सङ्गे वर्तमाना वीणा नयनसलिलै, आर्द्रतन्त्री जायते स्वयमपि कृतां च मूर्च्छनां भूयो भूयो विस्मरति—

तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद् ।
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्तीं ॥

यक्षोऽपि प्रियावियोगेन कामप्यद्भुतामेवावस्थां वहति । सः प्रियाङ्गलतासु (श्यामासु) प्रियाया अङ्गम्, चकितहरिणीप्रेक्षणे दृष्टिपातम्, शशिनि मुखकान्तिः शिखिनां पिच्छेषु केशान्, नदीवीचिषु प्रियाया भ्रूविलासान् पृथक्-पृथक् पश्यति किन्तु एकत्र क्वापि प्रियतमासादृश्यं न पश्यति—

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छाया शशिनी शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न हे चण्डि ! सादृश्यमस्ति ॥

यदा शिलायां धातुरागैः प्रियतमाचित्रं निर्माय आत्मानं तच्चरणपतितं कर्तुमिच्छति तदा अश्रुभिः नेत्रे पूरिते भवतः, तस्मिन् चित्रेऽपि प्रियां द्रष्टुं न पारयति

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥

स तु एतावान् विरहविधुरः सञ्जातोऽस्ति यत्कल्पनादृष्टां प्रियां निर्दय मालिङ्गितुमाकाशे हस्तौ प्रसारयति किन्तु क्षणमेव हस्तौ प्रियारहितौ ज्ञात्वा

CC-O. In Public Domain. Digitized by eGangotri

भृशं दुःखितो जायते, किं बहुना यक्षस्येमां कृपणां दशां दर्शं दर्शं वनस्थली देवता अपि मुक्तास्थूलानश्रुबिन्दून् पातयन्ति—

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरऽकिसलयेष्वश्रुलेशाः पतन्ति ।।

एवं प्रत्यक्षतया दृश्यते मेघदूते वियोगस्य बलवती वेदना । उभयपक्षात्मकमपि वियोगमेकस्मिन् श्लोके यक्षमुखेनोपसंहरन् कथयति कविः—

नत्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि ! त्वमपि नितरां मा गतः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।।

मेघदूते महाकविना कालीदासेन वर्णितो वियोगः विश्वरूपः सर्वेषां वियोगकवीनां मार्गदर्शकोऽस्ति ।

सूक्तिव्याख्या

१—मेघालोके भवनि सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।।

प्रसंग—श्लोकांशोऽयं महाकविना कालिदासेन विरचितस्य मेघदूतस्य खण्डकाव्यस्य पूर्वभागतः उद्धृतोऽस्ति । अत्र मेघस्योद्दीपकत्वं वर्णयन् कविः कथयति यत् प्रथमं तु यक्षो मेघस्य पुरतः कौतुकाधानहेतोः स्थितो जातः किन्तु पश्चाद् उद्दीप्तवियोगस्य तस्य नेत्राभ्यामश्रुप्रवाहो जातः—

व्याख्या—मेघस्य आलोके = दर्शने सति सुखिनः = संयोगिनः प्रियासहितस्यापि चेतः = मनः अन्यथा = अन्य प्रकारेण वृत्तिः = वर्तनं व्यवहारो तत् भवति = जायते कण्ठेन = गलप्रदेशेन आश्लेषः = आलिङ्गनं तत्र प्रणयः = प्रेम औत्सुक्यमस्यास्मिन्नस्तीति जने = प्रिये प्रियतमाया वा दूरं = विप्रकृष्टमन्यत्र प्रदेशे संस्थितो यस्याः तस्मिन् अन्यत्र वर्तमाने पुनः किम् = किं कथनीयम् ? तदा तु चेतोऽन्यथावृत्ति वियोगोद्दीप्तं भवत्येव ।

CC-O. Vasishtha Tripathi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

अर्थात् यदा मेघे दृष्टे सति संयोगिनोऽपि उद्दीप्तकामभावाः भवन्ति तर्हि प्रियतमजने दूरसंस्थे किं कथनीयम् तदा तु भवत्येव कामोद्रेकता ।

२—कामर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।

प्रसङ्गः—मेघदूतस्य श्लोकांशेऽस्मिन् कविः नेयं प्रति यक्षेण कृतायाः संदेश-याचनायाः सङ्गतिं प्रतिपादयन् कथयति यत् मेघो धूमज्योतिःसलिलमरुतां सन्निपात इति स सन्देशं नेतुं समर्थो नास्तीति किञ्चिदपि न विचारितवान् अपि तु याचनां कृतवान् एव यतो हि कामार्ताः चेतनाचेतनेषु प्रकृतिकृपणा भवन्ति ।

व्याख्या—कामेन = मन्मथेन आर्ताः = पीडिताः चेतनाः = सजीवाश्च अचे-तना = निर्जीवाश्च तेषु सजीवनिर्जीवेषु विवेके प्रकृतेः = स्वाभावतः कृपणाः = असमर्थाः भवन्तीति ।

अर्थाद् ये खलु कामभावनापीडिताः भवन्ति ते स्वभावतः एव कः सजीवः को निर्जीवः ? कः किं कर्तुं समर्थोऽस्ति ? कोऽसमर्थोऽस्तीति विवेके असमर्था एव भवन्ति ।

३— याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।

प्रसङ्गः—महाकविना कालिदासेन विरचितस्य मेघदूतस्य पूर्वभागस्य श्लोकांशेऽस्मिन् कविः यक्षमुखेन मेघं प्रति कृतायाः सन्देशप्रापणयाचनायाः सङ्गतिं स्थापयन् कथयति यत् मेघः पुष्करावर्तकानां भुवनविदितानां मेघानां वंशे जातोऽपि तथा तत् सङ्गोऽपि महता देवेन्द्रेण सह वर्तते यतो हि स मघोनः प्रधानपुरुषोऽस्ति । अतः उच्चकुलोत्पन्नत्वं महता सह सङ्गतिं च विचा-रयन्नेव यक्षो मेघं सन्देशार्थं याचितवान्—

व्याख्या—अधि = अधिकाः गुणाः = दयाक्षिण्यादयो गुणाः यस्मिन् तस्मिन् अधिकगुणयुक्ते जने मोघा = व्यर्था निष्फला अपि याच्ञा = याचना वरं = प्रियं श्रेष्ठम् उचितमिति भावः किन्तु अधमे = नीचे निर्गुणे जने लब्धः—प्राप्तः कामः = अभिलाषः यस्यां सा सफला अपि याच्ञा न वरम् ।

अभिलाषस्य पूर्तिः भवतु वा, न वा भवतु, गुणवान् एव प्रार्थनीयः न तु गुणरहितः । गुणरहितेन जनेन कामनापूर्तिः स्यादपि नाम तथापि स न प्रार्थनीयः ।

४—कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥

प्रसंगः—प्रसङ्गेऽस्मिन् यक्षो मेघमलकायाः मार्गं निर्दिशन् कथयति यदा त्वम् आकाशमार्गेण गमिष्यसि तदा 'मेघं' दृष्ट्वा मत्प्रियोऽवश्यमेवागमि-ष्यतीति प्रत्यायति पथिकवनिता वियोगिन्यः त्वां प्रेक्षिष्यन्ते यतो हि मेघे आकाशमारूढे सति कोऽपि एवं न भवति यो जायामुपेक्षेत ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—त्वयि = मेघे सशब्दे = आकाशमारूढे सति कः = को जन एवंभूतः यः विरहेण = वियोगेन विधुरां = पीडितां वियोगिनीं जायां = पत्नीम् उपेक्षेत = उपेक्षां कुर्यात न कोऽपीति भावः यतो हि अहं = यक्षः इह अन्यः = अपरः जनः = नरः न = नास्ति यः पराधीनवृत्तिः = परतन्त्रः स्यात् = भवेत् । स्वामिनः शापादहमेव परतन्त्रोऽस्मि नान्यः ।

अर्थात् मेघे आकाशमारूढे सति कोऽपि वियोगिनीं पत्नीं नोपेक्षेत, अवश्यमेव पत्नीं समागच्छतीति यतो हि अन्यः कोऽपि जनः एवं नास्ति यः अहमिव शाप-परतन्त्रः स्यात् ।

६— आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां ।
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ।

प्रसंग—प्रसङ्गेऽस्मिन् यक्षो मेघं सन्देशं नेतुं प्रार्थयन् कथयति यत् मम पत्नी तव भ्रातृजाया भवतीति सा त्वया निर्बाधं यथा स्यात्तथा द्रष्टव्या । सम्प्रति मदवियोगेन दुखिताऽपि सा मृता न स्यात् अपितु स्यात् एव यतो हि अङ्गनानां हृदयं यद्यपि कुसुमसदृशं सद्यः पाति किन्तु वियोगे आशाबन्धो हृदयं रुणद्धि आशया विरहिण्यो जीवन्त्येव ।

व्याख्या—आशा = मत्प्रिय आगमिष्यतीति भावना एव बन्धः = बन्धनं विप्रयोगे = वियोगे प्रायशः = बाहुल्येन न तु नियमेनेति अङ्गनानां = नायिकानां कुसुमसदृशं = कुसुमतुल्यं सद्यःपाति = शीघ्रपतनशीलं प्रणयि = प्रेमयुक्तं हृदयं = जीवितं रुणद्धि = प्रतिबध्नाति ।

६— न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय ।
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ।।

प्रसङ्गः—मेघदूतस्य पूर्वभागतः उद्धृतेऽस्मिन् श्लोकांशे यक्षो मेघं कथयति यत् त्वयि गते सति आम्रकूटपर्वतस्त्वां शिरसा सत्कृत्य धारयिष्यति यतो स तव मित्रमस्ति तथा च त्वया आसारेण प्रथमं वनोपप्लवस्य शान्तिः सम्पादिताऽस्ति । अतः स प्रथममुपकारं ध्वायं-ध्वायं विमुखो नैव भविष्यतीति भावः ।

व्याख्या—क्षुद्रः = नीचः अपि कश्चिज्जनः प्रथमं पूर्वं कृतं यत् संस्कृतं = पुण्यम् उपकृतमिति तस्य अपेक्षया = विचारेणेति यावत् मित्रे = सहृदि प्राप्ते = समागते सति संश्रयाय = धारणाय विमुखः = पराङ्मुखः न = न भवति तर्हि यः = आम्रकूटपर्वतः तथा = उन्नतैः शिखरैः उच्चैः = उन्नतोऽस्ति स पुनः किं = कि विमुखो भवितुमर्हति नैवेति भावः ।

अतो मित्रं त्वामागतं दृष्ट्वा आम्रकूटोऽयमेव धारयिष्यति यतो हि स त्वया पूर्वमुपकृतोऽस्ति, आसारेण वनोपप्लवशान्तेरिति भावः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

७—रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।

प्रसङ्गः—महाकविना कविताविलासेन कालिदासेन विरचितस्य मेघदूतस्य पूर्वभागतः उद्धृतेऽस्मिन् श्लोकांशे काव्यस्य नायको यक्षो मेघं मार्गं निर्दिशन् मध्ये मार्गे विन्ध्यपादे विशीर्णायाः रेवायाः जलं पातुं परामृशति यतो हि जलपानेन पूर्णताऽऽस्यति । पूर्णता तु गौरवाय भवति । अतएव क्षान्तदृष्टेः रिक्तस्य मेघस्य जलपानेन पूर्णतायाः आवश्यकत्वात् ।

व्याख्या—हि = यतः रिक्तः = शून्यः जलादिभिः रहित इत्यर्थः सर्वः = यः कोऽपि भवतु मेघो वा मनुष्यो वा पशुःपक्षी वा भवतु लघुः = तुच्छः भवति = गण्यते पूर्णता = सम्पन्नता गौरवाय = श्रेष्ठत्वाय भवति ।

अर्थात् समाजे यः कोऽपि भवतु यदि सः रिक्त धनधान्यादिशून्यो भवति तर्हि स तुच्छ इति गण्यते किन्तु सम्पन्नता गौरवस्य कारणं भवति । अतस्त्वया अवश्यमेव रेवाजलं पातव्यमिति ।

८—"स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।"

प्रसङ्गः—कविताविलासेन महाकविना कालिदासेन विरचितस्य मेघदूतनामकस्य खण्डकाव्यस्य पूर्वभागतो गृहीतेऽस्मिन् श्लोकांशे सन्देशं प्रापयितुं मेघं प्रार्थयित्वा तं मार्गं निर्दिशन् निर्विन्ध्यायाः नद्याः रसान्तरे सन्निपत्य अवितुं परामृशति । यतो हि विहगाकूजनरूपकाञ्चीतगुणरवेण, स्खलिसुभगसंसर्पणेन आवर्तरूपनाभिप्रदर्शनेन च तया मेघं प्रति विभ्रमं प्रदर्श्य आद्यं प्रणयवचनमेवोक्तमिति—

व्याख्या—हि = यतः प्रियेषु = नायकेषु स्त्रीणां = कामिनीनां विभ्रमः = विलास एव आद्यं = प्रथमं प्रणयस्य = प्रेम्णः वचनं = कथनमिति ।

स्त्रियो हि काङ्क्षन्त्यपि प्रणयं प्रथमं नुत्सृष्टं शब्दतो न कथयन्ति अपि तु विभ्रमप्रदर्शनेनैव तत्प्रकटयन्तीति विभ्रमप्रदर्शनमेव स्त्रीणामाद्यं प्रणयनिवेदनमस्ति । अतो निर्विन्ध्याया विभ्रमं दृष्ट्वा तत्प्रणयं मत्वा तस्या रसान्तरे सन्निपातः आवश्यक इति ।

९—मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ।

प्रसङ्गः—महाकविना कालिदासेन विरचितस्य मेघदूतस्य पूर्वभागतो गृहीतेऽस्मिन् श्लोकांशे रामगिर्याश्रमस्थो यक्षो मेघं मार्गं निर्दिशन् मार्गस्य वक्रत्वेऽपि उज्जयिनीमवश्यं गन्तुं परामृश्य तत्र सायंकाले महाकालेश्वरपूजायां पटहतां सम्पादयितुं तथा च रात्रौ तत्र कन्याश्चिद् भवनबलभौ विधमितुमादिश्य प्रातःकाले पुनरपि स्वकार्यं संलग्नं भवितुं परामृशन् मेघं कर्त्तव्यमुपदिशति—

Sri Vidyabharathi Book Centre, Sringeri

व्याख्या—सुहृदां = मित्राणां अभ्युपेत = स्वीकृतम् अर्थकृत्यं = प्रयोजनकार्यं तैस्ते न मन्दायन्ते = मन्दा न भवन्ति खलु = निश्चयेन । अर्थात् ये जना:

CC-O. In Public Domain. Digitized by eGangotri

मित्राणां गुरुतरं कार्यमङ्गीकुर्वन्ति ते निश्चयमेव कार्यादुदासीनाः न भवन्ति अपितु मनोयोगेन कार्यं कुर्वन्तीति भावः ।

१०— ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ।

प्रसंगः—महाकविना कालिदासेन विरचितस्य मेघदूतस्य पूर्वभागतः उद्धृतेऽस्मिन् श्लोकांशे महाकविः यक्षमुखेन मेघं गम्भीरानदीतः सावधानतामुपदिशति यतो हि मेघं दृष्ट्वा तस्याः रागात् कटिभागतो जलरूपं वस्त्रमेव स्रंसितं यास्यति । अतो विवृतजघनां तां दृष्ट्वा रसिको मेघस्ततः कथं कथमपि गन्तुं प्रवृत्तो भविष्यति यतो हि विवृतजघनां विहातुं कः समर्थो भवति ?

व्याख्या—ज्ञातः = अनुभूतः आस्वादः विषयरसः कः = पुरुषः विवृतं = प्रकटितं स्रंसितवस्त्रं जघनं = कटिपुरोभागो यस्यास्तां विहातुं = त्यक्तुं रतिविषयतामविधातुं समर्थः = क्षमः अस्ति न कोऽपीति भावः । यः खलु अननुभूतरसोऽस्ति तस्य तु भवतु नाम पराङ्मुखता किन्तु यः प्राप्तविषयास्वादोऽस्ति स विवृतजघनां प्रदर्शितविभ्रमां नायिकां त्यक्तुं नैव समर्थो भविष्यति । अतः सावधानतया स्रस्तनीरवस्त्रां तां स्यक्त्वा त्वं स्वकार्यं दर्शं दर्शं ततोऽवश्यमेवाग्रे गमिष्यसीति धिया प्रार्थना ।

११—आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ।

प्रसङ्गः—श्लोकांशोऽयं महाकविना कालिदासेन विरचितस्य मेघदूतकाव्यस्य पूर्वभागतः उद्धृतोऽस्ति । प्रसङ्गेऽस्मिन् प्रियावियुक्तो रामगिर्याश्रमस्थो यक्षः सन्देशं प्रियां प्रापयितुं मेघं प्रार्थयित्वा तं मार्गं निर्दिशन् हिमालयं प्राप्यं स्ववारिपीडितानां रक्षार्थमेव भवन्तीति कथयति—

व्याख्या—हि = यतः उत्तमानां = श्रेष्ठानां सम्पदः = विभूतयः आपन्नानां = पीडितानाम् आर्तीनां = पीडानां प्रशमनं = शान्तिः एव फलं = परिणामो यासां ताः एवं भूता भवन्ति । अर्थात् परोपकारपरायणानामुत्तमानां जनानां सम्पत्तयः पीडितानां पीडाऽपनयनायैव भवन्ति न तु स्वार्थायेति ।

१२—के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ।

प्रसङ्गः—महाकविना कालिदासेन विरचितस्य मेघदूतस्य पूर्वभागतः समुद्धृतेऽस्मिन् श्लोकांशे कविनिबद्धवक्ता यक्षो मेघं मार्गं निर्दिशन् कथयति यत् त्वं हिमालयं प्राप्य तत्र त्वां लाङ्घितुं कृतप्रयत्नान् मृगान् तुमुलकरकापातैः निष्फलारम्भयत्नान् करिष्यसीति तं परामृशति—

व्याख्या—निष्फलः = विफलः व्यर्थः आरम्भानां = कर्मणां यत्नः = प्रयासो येषां ते के = जनाः परिभवपदं = तिरस्कारभाजनं न स्युः = न भवेयुः । यः खलु व्यर्थं यथा स्यात्तथा कर्म करिष्यति स तिरस्कृतो भविष्यत्येव ।

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

मेघदूतादर्शः

श्लोकव्याख्या :

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

सन्दर्भः—श्लोकोऽयं, कवितावनितालललाटिकायमानेन, कविकुलमकमल-दिवाकरेण, संस्कृतसाहित्यमहोदधिपूरणाय जलदायमानेन विद्वन्मण्डलण्डनाय-मानेन कविताविलासेन महाकविना कालिदासेन विरचितस्य खण्डकाव्यस्य मेघदूतस्य पूर्वभागादुद्धृतोऽस्ति ।

प्रसङ्गः—अत्र कविः कुवेरशापनिर्वासितं रामगिर्याश्रमस्थं कञ्चिद् यक्षं वर्णयति ।

अन्वयः—स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे ।

व्याख्या—स्वाधिकारात् = स्वनियोगात् प्रमत्तः = अनवहितः कान्तायाः = वल्लभायाः विरहो = वियोगः तेन गुरुः = दुर्वहस्तेन वर्षभोग्येण = संवत्सरभो-ग्येण भर्तुः = स्वामिनः कुवेरस्य शापेन = कोपवचनेन अस्तङ्गतः = प्रतिहतो महिमा = प्रभावो यस्यैवंभूतः कश्चित् = अनिर्दिष्टनामा यक्षो देवयोनिविशेषः जनकतनयायाः = सीतायाः स्नानैः = अवगाहनैः पुण्यानि = पवित्राणि उद-कानि = जलानि, येषु तेषु, स्निग्धाः = सान्द्राः छाया येषां ते च तरवः = वृक्षा येषु तेषु अनेन वियोगिनी योग्यं स्थानं ध्वन्यते, रामगिरेः = चित्रकूटस्य आश्र-मेषु = आश्रमस्थानेषु वसतिं = निवासं चक्रे = कृतवान् ।

CC-O. Jagadguru Kripa Vidyaranya Bharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अत्र क, द, ल वर्णानामनेकवारमावृत्तेः 'वर्णावृत्तिरनुप्रासः' इति लक्षणात्। मन्दाक्रान्ता वृत्तम्। 'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्' इति लक्षणात्।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

सन्दर्भ—द्रष्टव्यं श्लो० १।

प्रसङ्गः—अत्र तस्मिन् रामगिर्याश्रमे कतिचिन्मासान् अतिवाह्य आषाढे मासे पर्वतशिखरमाश्लिष्टं मेघं ददर्शेति वर्णयति कविः।

अन्वयः—अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः स कामी तस्मिन् अद्रौ कतिचित् मासान् नीत्वा आषाढस्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीडा-परिणतगजप्रेक्षणं मेघं ददर्श।

व्याख्या—तस्मिन्नद्रौ = चित्रकूटपर्वते अबलाविप्रयुक्तः = कान्ताविरहितः कनकस्य = सुवर्णस्य वलयः = कंकणभाभूषणविशेषः तस्य भ्रंशेन = पातेन रिक्तः = शून्यः प्रकोष्ठः भुजप्रदेशो यस्य स तथोक्तः. अतिशयः कृशः इतिभावः कामी = कामुकः स यक्षः तस्मिन् अद्रौ = पर्वते कतिचित् मासान् = अष्टौ मासान् नीत्वा = यापयित्वा आषाढस्य = आषाढमासस्य प्रथमदिवसे आश्लिष्टाः आलिङ्गिताः सानवः शिखराणि येन तम् तथा वप्रक्रीडा = पर्वततटे तिर्यग्दन्त-प्रहारस्तत्र परिणतः = संलग्नो यो गजः = हस्ती तद्वत्प्रेक्षितुं योग्यो रमणीयो यः तम् मेघं ददर्श।

अत्र पर्वेतसानुश्लिष्टस्य वप्रक्रीडापरिणतेन गजेन सादृश्यवर्णनादुपमा 'साधर्म्यमुपमा भेदे' इति लक्षणात्। मन्दाक्रान्ता वृत्तम्।

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

Sri Vidyabharathi Book Centre, Gringeri

सन्दर्भः—द्रष्टव्यं श्लो० १।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसंगः—अत्र [illegible] प्रियाविरहं मेघं प्रति प्रार्थयमानः प्रियाविरहितः सन् समधिकं खेदमनुभूतवान् इति वर्णयति कविः ।

अन्वयः—कौतुकाधानहेतोः तस्य पुरः कथमपि स्थित्वा अन्तर्बाष्पः राजराजस्य अनुचरः चिरम् दध्यौ । मेघालोके सुखिनः अपि चेतः अन्यथावृत्ति भवति कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे पुनः किम् ?

व्याख्या—कौतुकाधानहेतोः = कौतुकानां आधानं तस्य हेतोः कारणात् तस्य = मेघस्य पुरः = अग्रे कथमपि = महता कष्टेन स्थित्वा अन्तर्बाष्पः = धीरोदात्तत्वात् अन्तः स्तम्भिताश्रुः सन्, राजराजस्य = धनदस्य अनुचरः = किंकरः यक्षः चिरं = चिरकालं दध्यौ = ध्यातवान् स्वजायां अभिसन्धाय चिरं चिन्तयति स्म इत्यर्थः । मेघालोके = मेघदर्शने सति सुखिनः = कान्तासंहितस्यापि पुंसः चेतोः = मनो अन्यथावृत्ति = उत्कण्ठितं भवति = सम्पद्यते, कण्ठे आश्लेषः = आलिङ्गनं तत्र प्रणयः = प्रीतिः यस्य तस्मिन् वल्लभालक्षणे जने दूरसंस्थे = अन्तर्धाने भाजि सति किं पुनः = किं वक्तव्यम्, तदा तु चेत अन्यथावृत्ति भवत्येव इत्यर्थः ।

अत्र राजेराजेत्यत्र छेकानुप्रासः । उत्तरार्धरूपसामान्येन पूर्वार्धरूपविशेषस्य समर्थनात् अर्थान्तरन्यासः—'सामान्यं च विशेषेण विशेषस्तेन वा यदि समर्थ्यते अर्थान्तरन्यासोऽसौ इति लक्षणात् । मन्दाक्रान्ता वृत्तम् ।

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥४॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र प्रस्तुते श्लोके प्रियाविमुक्तो यक्षः एवंभावं कृपणः आसीत्, यत् स मेघः समर्थेन्द्रियो नास्ति, अयं सन्देशं नेतुं समर्थो नास्तीति किञ्चिदपि न विचारितवान् तया सन्देशं नेतुं मेघं प्रार्थितवान् इति वर्णयति कविः ।

अन्वयः—धूमज्योतिःसलिलमरुतां सन्निपातः मेघः क्व ? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व ? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे, हि कामार्ताः चेतनाचेतनेषु प्रकृतिकृपणाः (भवन्ति) ।

Sri Vidyabharati Book Centre, Sringeri

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri

व्याख्या—धूमश्च ज्योतिः = अग्निः ते च सलिल = पानीयं च मरुत् = वायुश्च तेषामचेतनानां सन्निपातः = समुदायरूपो मेघः = जीमूतः क्व, पटूनि = स्पष्टानि करणानि = इन्द्रियाणि येषां ते तैः प्राणिभिः = पुम्भिः सचेतनैरित्यर्थ प्रापणीयाः = नेतव्याः सन्दिश्यन्ते कथ्यन्ते इति सन्देशाः ते च ते अर्थाश्च क्व इत्येतदसम्भाव्यमिति । औत्सुक्यात् = इष्टार्थोद्युक्तत्वाद् अपरिगणयन् = अविचारयन् गुह्यकः = यक्षः तं = मेघं ययाचे = याचितवान् । स्वप्रियायाः पार्श्वे सन्देशं नेतुं प्रार्थितवान् हि = यतः कामेन = मन्मथेन आर्ताः = पीडिताः प्राणिनः चेतनाश्च अचेतनाश्च ते = स्थावरजङ्गमाः तेषु प्रकृत्या = स्वभावेन कृपणाः = दीनाः भवन्ति, चेतनाचेतनविवेकेऽसमर्था भवन्तीति भावः ।

अत्र समान्येन विशेषसमर्थनरूपोऽर्थान्तिरन्यास···'सामान्यं च विशेषेण विशेषस्तेनवा यदि समर्थ्यते अर्थान्तिरन्यासोऽसौ' इति लक्षणात् मन्दाक्रान्ता वृत्तम् ।

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ॥५॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र कुबेरशापादस्तंगमितमहिमा रामगिर्याश्रमस्थोयक्षः स्वप्रियायाः पार्श्वे सन्देशं प्रापयितुं मेघस्य प्रशंसा करोति ।

अन्वयः—भुवनविदिते पुष्करावर्तकानां वंशे जातं कामरूपं मघोनः प्रकृतिपुरुषं त्वां जानामि, तेन विधिवशाद् दूरबन्धुः अहं त्वयि अर्थित्वं गतः अधिगुणे मोघा याञ्चा वरम् अधमे लब्धकामा न ।

व्याख्या—हे मेघ भुवनेषु = लोकेषु विदिते = प्रसिद्धे पुष्कराश्चावर्तकाश्च = कल्पान्तकालजलदास्तेषां वंशे = अन्वये जातम् = उत्पन्नं महाकुलप्रसूतिमित्यर्थः तथा कामरूपं = स्वेच्छाचारिणम् तथा मघोनः = इन्द्रस्य प्रकृतिपुरुषम् = प्रधानपुरुषम् त्वां जानामि = अवगच्छामि तेन हेतुना विधिवशाद् = देवायत्तत्वात् दूरबन्धु = विप्रकृष्टभार्योऽहं त्वयि = मेघे अर्थित्वं गतः = प्राप्त अधिगुणे अधिका औदार्यादयो गुणा यस्य सोऽधिगुणस्तस्मिन् याञ्चा मोघा = निरर्थकमपि वरं = प्रियम्, अधमे = गुणरहिते लब्धकामा = प्राप्ताभिलाषापि सा वरं न, ईषत्प्रियमपि न भवतीत्यर्थः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः-सामान्यं च विशेषेण विशेषस्तेन वा यदि। सामर्थ्यतेऽर्थान्तरन्यासोऽसौ' इति लक्षणात्। मन्दाक्रान्ता वृत्तम्।

संतप्तानां त्वमसि शरणं तत्पयोद ! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥६॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसङ्गः—प्रस्तुतेऽस्मिन् श्लोके सन्देशं नेतुं मेघं प्रार्थयन् तत्प्रशंसां च कुर्वन् यक्षः मेघं श्रावयति यत् तव गन्तव्या भगवतः शङ्करस्य शिरस्थितचन्द्रचांदनीयमत्कृतप्रासादा यक्षनगरी अलकाऽस्ति इति।

अन्वयः—हे पयोद ! त्वं सन्तप्तानां शरणम् असि तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियायाः हर। बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम यक्षेश्वराणां वसतिः ते गन्तव्या (अस्तीविशेषः)।

व्याख्या:—हे प्रयोद !=हे जलद ! त्वं सन्तप्तानाम्=पीडितानाम् आतपेन स्मरेण च प्राणिनां शरणम्=आश्रयोऽसि=भवसि तत्=तस्मात् कारणात् धनपतेः=कुबेरस्य कोपेन=क्रोधेन विश्लेषितस्य वियोजितस्य, अनेन स्वकीयः सन्तापः दर्शितः मे=मम यक्षस्य सन्देशं वार्तां प्रियायाः पार्श्वे हर=प्रापय। कुत्र स्थाने सा स्थितेति चेदुच्यते अलकाभिधाना पुरीनामेति, बहिर्भवं बाह्यं च तद् उद्यानं=कैलासोपवनं तत्र स्थितश्चासौ हरः=ईशः तस्य शिरसि=मूर्ध्नि या चन्द्रिका=चन्द्रातपस्तया धौतानि=निर्मलानि हर्म्याणि=धनिकगृहाणि यस्यां सा, अलका=नाम्नालकेति प्रसिद्धा यक्षेश्वराणां वसतिः=स्थानं ते=तव गन्तव्या अस्तीति शेषः तत्र गन्तुं त्वां प्रार्थये इति भावः।

अत्र सन्देशहरणं प्रति सन्तप्तानां कारणत्वेन प्रतिपादनात् काव्यलिङ्गमलङ्कारः—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात्। मन्दाक्रान्ता वृत्तम्।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection, Chennai. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसङ्गः—प्रस्तुते श्लोके स्वप्रियायाः पार्श्वं स-देशं नेतुं मेघं प्रार्थयन् यक्षः सम्प्रति तत्कालमेव त्वया प्रस्थानं कर्त्तव्य मित्यत्र औचित्यं प्रतिपादयति।

अन्वयः—यथा च अनुकूलः पवनः त्वां मन्दं मन्दं नुदति अयं च ते सगन्धः चातकः वामः (सन्) मधुरं नदति गर्भाधानक्षणपरिचयात् आबद्धमालाः बलाकाः नयनसुभगं भवन्तं खे नूनं सेविष्यन्ते।

व्याख्या—यथा अनुकूलः = पृष्ठप्रदेशानुगामी पवनः = वायुः = त्वां....भवन्तं मन्दं मन्दं = शनैः शनैः नुदति = प्रेरयति अयं = चातकः ते = तव सगन्धः = सगर्वः सम्बन्धीति केचित् वामः = वामभागस्थः मधुरं = प्रदीप्तस्वरं यथा स्यात् तथा नदति = शब्दं करोति नूनं = निश्चयं गर्भस्य = कुक्षिस्थितस्य जन्तोराधानं = धारणं तस्मिन् क्षणे = समये परिचयः = सङ्गस्तस्मात् आबद्धा माला याभिस्ताः पंक्तिबद्धाः बलाकाः = बिसकण्टिकाः नयनसुभगं = दृष्टिप्रियं भवन्तं खं = आकाशे नूनं = निश्चयमेव सेविष्यन्ते = आश्रयिष्यन्ते।

अत्र मन्दं मन्दमित्यत्रानुप्रासः। 'नूनं सेविष्यन्ते' इत्यत्रोत्प्रेक्षा। मन्दाक्रान्ता वृत्तम्।

तां चावश्यं दिवसगणनातत्परामेकपत्नी—
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥८॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसङ्गः—अत्र प्रस्तुते श्लोके रामगिर्याश्रमस्थो यक्षः स्वप्रियाया अव्यापन्नत्वं सम्भावयति तथा च स्वप्रियां मेघस्य भ्रातृजायामुक्त्वा तत्पार्श्वं मेघगमने तया सह वार्तालापे च कश्चिद् दोषो नास्तीति मेघं प्रति प्रतिपादयति।

अन्वयः—दिवसगणनातत्पराम् एकपत्नीं तां भ्रातृजायाम् अव्यापन्नाम् अविहतगतिः अवश्यं द्रक्ष्यसि हि आशाबन्धः अङ्गनानां कुसुमसदृशं विप्रयोगे सद्यः पाति प्रणयि हृदयं प्रायशः रुणद्धि।

Sri Vidyabharathi Book Centre, Srirangam

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—अविहतगतिः = अविच्छिन्नगतिः दिवसगणनातत्पराम् = दिवसानाम् = अवशिष्टानाम्, दिनानां गणनायां = संख्याने तत्पराम् = आसक्ताम् एकपत्नी = एकः पतियस्या सा एकपत्नी ताम् पतिव्रतामित्यर्थः भातृजायाम् = अग्रजपत्नीम् अव्यापन्नाम् = अमृताम् शापावसाने मदागमनप्रत्याशया जीवन्तीम् इत्यर्थः, अवश्यं = निश्चितं द्रक्ष्यसि = विलोकयिष्यसि तथा हि आशाः = अति, तृष्णा वध्यतेऽनेनेति बन्धो = बन्धनम् वृन्तमितियावत् आशैव बन्ध आशाबन्धः, अङ्गनानां नायिकानां कुसुमसदृशम् = पुष्पवत्सुकुमारं विप्रयोगे = वियोगे विश्लेषे सद्यःपाति = तत्क्षणादेव पतनशीलम् प्रणयि = प्रेमयुक्तम् हृदयं = जीवितम् रुणद्धि = प्रतिबध्नाति ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः—'सामान्यं च विशेषेण विशेषस्तेन वा यदि । समर्थ्यते अर्थान्तरन्यासोऽसौ' इति लक्षणात् । मन्दाक्रान्ता वृत्तम् ।

आपृच्छस्व प्रियसखमुच्चैरालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥९॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसङ्गः—अत्र यक्षो रामगिरि मेघस्य मित्रत्वेन प्रतिपादयन् सन्देशप्रायरूपकर्मणि तदादेशं ग्रहीतुं परामृशति—

अन्वयः—पुंसां वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितं प्रियसखम्, काले काले भवतः संयोगम् एत्य चिरविरहजम् उष्णं बाष्पं मुञ्चतः यस्य स्नेहव्यक्तिः भवति । (तम्) अमुं तुङ्गं शैलम् आलिङ्ग्य आपृच्छस्व ।

व्याख्या—पुंसां = प्राणिनां वन्द्यैः = नमस्कर्तुं योग्यैः रघुपतेः = श्रीरामचन्द्रस्य पदैः = चरणन्यासैः मेखलासु = मध्यप्रदेशेषु अङ्कितम् = चिह्नितम् प्रियश्चासौ सखा च तं प्रियसखम् = प्रियमित्रम् काले काले = प्रति प्राबृट्कालम् भवतः संयोगं = सम्पर्कम् एत्य = प्राप्य चिरविरहजम् चिरकालिकविरहोत्पन्नम् उष्णं बाष्पमुष्माणं नेत्रजलं च मुञ्चतो यस्य स्नेहव्यक्तिः = प्रेमाविर्भावो भवति तमेवंभूतम् अमुं = पुरतो दृश्यमानं तुङ्गम् = उन्नतं शैलं = पर्वतं रामगिरिम्

CC-O. Vidyabharathi Book Centre, Chennai.

CC-O. In Public Domain. Digitized by eGangotri
आलिङ्ग्य = आश्लेष कृत्वा आपृच्छस्व = अतो गन्तुमाज्ञां गृहाण, अथवा अहं यामीति आमन्त्रणेन सभाजय ।

अत्र 'काले काले' 'भवति भवतो' इत्यादिषु छेकानुप्रासः 'छेको व्यञ्जन-सङ्घस्य सकृत्साम्यमनेकधा' इति लक्षणात् । मन्दाक्रान्ता वृत्तम् ।

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥१०॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसङ्गः—अत्र स्वप्रियायाः पार्श्वे सन्देशं नेतुं तथा अलकां गन्तुं प्रथमं मलकां यावत् मार्गं वर्णयितुमुपक्रमते ।

अन्वयः—हे जलद ! तावत् कथयतः (मत्तः) तत्प्रमाणानुरूपं मार्गं शृणु यत्र खिन्नः खिन्नः शिखरिषु पदं न्यस्य क्षीणः क्षीणः च स्रोतसां परिलघु पयः उपभुज्य गन्तासि तदनु मे श्रोत्रपेयम् संदेशं श्रोष्यसि ।

व्याख्या—जलं ददातीति जलदः तस्य सम्बुद्धौ भो जलद् = मेघ ! तावत् इदानीं कथयतः मत्तः इति शेषः त्वत्प्रयाणानुरूपम् = तव गमनयोग्यं मार्गं = अध्वानम् शृणु पन्थानमाकर्णय खिन्नः खिन्नः = मार्गायासक्लान्तः सन् शिखरिषु = पर्वतेषु पदं न्यस्य = निक्षिप्य क्षीणः क्षीणः = अभीक्ष्णं कृशाङ्गः सन् स्रोतसां सरित्प्रवाहाणां परिलघु = गुरुत्वदोषरहितम् पयः = पानीयं उपभुज्य = पीत्वा गन्तासि = गमिष्यसि, तदनु मार्गाकर्णनपश्चात् मे श्रोत्रपेयम् = श्रोत्राभ्यां पेयं पानार्हम् सन्देशं = वाचिकं श्रोष्यसि ।

अत्र 'खिन्नः खिन्नः क्षीणः क्षीणः' इत्यादिषु छेकानुप्रासः—छेको व्यञ्जन-सङ्घस्य सकृत्साम्यमनेकधा' इति लक्षणात् । मन्दाक्रान्ता वृत्तम् ।

रत्नच्छायाऽऽव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुः खण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥११॥

Sri Vidyabharathi Book Centre, Mysore

CC-O. In Public Domain. Digitized by eGangotri

सन्दर्भः —द्रष्टव्यं श्लो० १ ।

प्रसंगः —अत्र रामगिर्याश्रमस्थो यक्षः तत्रत एव वल्मीकिस्थानं निर्दिशति यत्र इन्द्रस्य धनुखण्डमुदेति । तत्रत एवालकामार्गस्य प्रारम्भो भविष्यति, तथा तत्र तत्र गमनेन मेघशोभायाः वृद्धिः भविष्यतीति वर्णयति ।

अन्वयः— रत्नच्छायाव्यतिकर इव प्रेक्ष्यम् एतत् आखण्डलस्य धनुः खण्डं पुरस्तात् वल्मीकाग्रात् प्रभवति, येन ते श्यामं वपुः स्फुरितरुचिना बर्हेण गोपवेषस्य विष्णोः श्यामं वपुरिव अतितरां कान्तिम् आपत्स्यते ।

व्याख्या—रत्नच्छायानां = पद्मरागादिमणिप्रभाणां व्यतिकरो = मिश्रणमिव प्रेक्ष्यम् = दर्शनीयम्, आखण्डलस्य = इन्द्रस्य एतत् = दृश्यमानं धनुःखण्डं = कामुकांशः पुरस्तात् = अग्रे वल्मीकाग्रात् = वामूलवालूरविवरात् प्रभवति = आविर्भवति येन = धनुखण्डेन ते = तव श्यामं = कृष्णं वपुः = शरीरं स्फुरितरुचिना = उज्ज्वलकान्तिना बर्हेण = पिच्छेन गोपवेषस्य विष्णोर्गोपालस्य कृष्णस्य श्यामं वपुः = शरीरं बर्हेण इव अतितरां = शोभां आपत्स्यते = प्राप्स्यते ।

अत्र खण्ड खण्डेत्यस्यावृत्या छेकानुप्रासः । प्रथमचतुर्थचरणयोः उपमा । मन्दाक्रान्ता वृत्तम् ।

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥१२॥

सन्दर्भ :—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र मार्गं वर्णयन् यक्षो रामगिर्याश्रमतः सरसविपुलव्याप्तदेशतः मालदेशं गन्तुं परामृशति ततश्च किञ्चिदुत्तरेणालकायाः मार्गमस्तीति वर्णयति ।

अन्वयः—कृषिफलं त्वयि आयत्तम् इति प्रीतिस्निग्धैः भ्रूविलासानभिज्ञैः जनपदवधूलोचनैः पीयमानः मालं क्षेत्रं सद्यः सीरोत्कषणसुरभि (यथा स्यात्तथा) आरुह्य पश्चात् लघुगतिः भूय किञ्चिद् उत्तरेण व्रज ।

Sri Vidyabharathi Book Centre, Sringeri

व्याख्या—कृषेः = हलकर्मणः फलम् = शस्यम् त्वयि = आयत्तम् = अधीनम इति हेतोः, प्रीत्या स्निग्धैः = अकृत्रिमप्रेमार्द्रैः भ्रूविलासानां = भ्रूविकाराणां

CC-O. In Public Domain. Digitized by eGangotri

अनभिज्ञैः = अकुशलैः जनपदवधूनां = पल्लीयोषितां लोचनैः = नयनैः पीयमानः = सादरं वीक्ष्यमाणः सन् मालं = मालाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलम् सद्यः = तत्कालमेव सीरैः = हलैः उत्कर्षणेन सुरभि = घ्राणतर्पणं यथा स्यात् तथा आरुह्य पश्चात् लघुगतिः = शनैः शनैः यद्वा शीघ्रमामी भूयः किञ्चित् = तिर्यक् प्रगमनः सन् उत्तरेण = उत्तरस्यां दिशि व्रज = गच्छ ।

अत्र द्वितीयचरणं प्रति प्रथमचरणस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । मन्दाक्रान्ता वृत्तम् ।

त्वमासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १३ ॥

सन्दर्भः :—इष्टव्यं श्लो० ।

प्रसंगः :—अत्र मार्गवर्णनप्रस्तावे यक्षो मेघं रामगिरितो मालदेशं ततश्च आम्रकूटपर्वतं गन्तुं निर्दिशति यः खलु मेघस्य मित्रमस्तीति वर्णयति कविः—

अन्वयः—आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वां मूर्ध्ना साधु वक्ष्यति । क्षुद्रः अपि मित्रे संश्रयाय प्राप्ते प्रथमसुकृतापेक्षया विमुखः न भवति यः तथा उच्चैः (सः) पुनः किम् ?

व्याख्या—आम्रकूटः आम्राः चूतवृक्षाः कूटेषु = शिखरेषु यस्य स आम्रकूटो नाम सानुमान्पर्वतः आसारः = धाराकृष्टिः तेन प्रशमितो = शान्तः वनोपप्लवः = दावाग्निः येन तम् अध्वश्रमपरिगतम् = मार्गबलमयुक्तम् त्वां = भवन्तं मूर्ध्ना = मस्तकेन साधु = उपयुक्तं यथा स्यात्तथा वक्ष्यति = धारयिष्यति क्षुद्रोऽपि = नीचोऽपि मित्रे = सुहृदि संश्रयाय = संश्रयणाय आगते सति प्रथमसुकृतापेक्षया = पूर्वोपकारपर्यालोचनया विमुखो = पराङ्मुखो न भवति यः तथा = तेन प्रकारेण उच्चैः = उच्चतरः स आम्रकूटः पुनः किम् तद्विषये किं वक्तव्यम् ? स न विमुखो नैव भविष्यतीति भावः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । मन्दाक्रान्ता वृत्तम् ।

स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१४॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसङ्गः—अत्र रामगिरितोऽलकां गच्छन् मेघ आम्रकूटपर्वतनिकुञ्जतो विन्ध्यपादे विशीर्णाया रेवायाः दर्शनं करिष्यतीति यक्षो मेघं कथयति ।

अन्वयः—वनचरवधूभुक्तकुञ्जे तस्मिन् मुहूर्तं स्थित्वा तोयोत्सर्गद्रुततरगतिः तत्परं वर्त्म तीर्णः उपलविषमे विन्ध्यपादे विशीर्णां रेवां गजस्य अङ्गे भक्तिच्छेदैः विरचितां भूतिम् इव द्रक्ष्यसि ।

व्याख्या—भो मेघ ! वनचरवधूभिः = किरातवनिताभिः भुक्ता निकुञ्जः = लतादिपिहितोदरं स्थानं यस्य स तस्मिन् मुहूर्तं = अल्पकालम् स्थित्वा = विरम्य तोयोत्सर्गात् = जलत्यागात् द्रुततरगतिः = अतिक्षिप्रगमनः सन् तस्मात् आम्रकूटात्परम् = अनन्तरं वर्त्म = मार्गं तीर्णः = अतिक्रान्तः उपलैः = पाषाणैः विषमे विन्ध्यस्य = विन्ध्याचलस्य पादे = प्रान्तभागे । विशीर्णां = ससन्तो प्रसां रेवां = नर्मदाम् = हस्तिनः अङ्गे = शरीरे भक्तिछेदैः = रचनाविशेषैः विरचिताम् भूतिं = शृंगारमिव द्रक्ष्यसि अवलोकयिष्यसि ।

अत्र विन्ध्यपादे विशीर्णायाः रेवायाः गजस्याङ्गे विरचितभूतिसादृश्य-सम्भावनादुत्प्रेक्षाऽलङ्कारः । मन्दाक्रान्ता वृत्तम् ।

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहततरयं तोयमादाय गच्छेः ।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥१५॥

सन्दर्भः—द्रष्टव्यं श्लो० १

प्रसङ्गः—अत्र रामगिर्याश्रमस्थो यक्षोऽलकां वसन्तीं स्वप्रियां प्रति सन्देशं नेतुं प्रार्थितं मेघं रामगिरिदो विन्ध्यपादे प्रवहमानां रेवां प्राप्य ततो जलमा-दातुं परामृशति—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—वान्तवृष्टिः (त्वम्) तिक्तैः वनगजमदैः वासितं जम्बूकुञ्ज-प्रतिहतरयं तस्याः तोयम् आदाय गच्छेः। घन ! अनिलः अन्तःसारं त्वां तुलयितुं न शक्ष्यति हि रिक्तः सर्वः लघु भवति पूर्णता गौरवाय (भवति)।

व्याख्या—हे मेघ ! वान्तवृष्टिः = उद्गीर्णवर्षः सन् त्वं तिक्तैः = सुगन्धिभिस्तिक्तरसवद्भिश्च वनगजमदैः = अरण्यद्विपदानैः वासितं = सुगन्धीकृतम्, तस्याः रेवायाः तोयम् = जलम् आदाय = गृहीत्वा गच्छेः = यायाः घन = मेघ ! अन्तः सारो बलं यस्य तं त्वां तुलयितुं = तूल इवाचरितुम् अनिलः = वायुः न शक्ष्यति = न शक्तो भविष्यति हि = यतः रिक्तः = अन्तःसारशून्यः सर्वोऽपि लघुर्भवति पूर्णत्वं गौरवाय = गरिम्णे भवति।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। मन्दाक्रान्ता छन्दः।

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥१६॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसङ्गः—अत्र यक्षः स्वसन्देशवाहकं मेघं रेवायाः जलं पातुं परामृश्य, तत्तटोत्पन्नाः कन्दलीः भक्षितुं पृथिव्याः गन्धमाघ्रातुं च कृतप्रयत्नाः सारंगाः, हस्तिनो भ्रमराश्च ते मार्गसूचकाः भविष्यन्तीति प्रतिपादयति।

अन्वयः—अर्धरूढैः केसरैः हरितकपिशं नीपं दृष्ट्वा अनुकच्छम् आविर्भूतप्रथममुकुलाः कन्दलीः च जग्ध्वा अरण्येषु उर्व्याः अधिकसुरभिं गन्धं च आघ्राय सारङ्गाः जललवमुचः ते मार्गं सूचयिष्यन्ति।

व्याख्या—अर्धरूढैः = एकदेशोद्गतैः केसरैः = किञ्जलकैः हरितं = पलाशवर्णं कपिशं = कृष्णपीतं च नीपं = स्थलकदम्बकुसुमम् दृष्ट्वा = सम्प्रेक्ष्य अनुकच्छम् = कच्छससीपे आविर्भूताः = प्रकटीभूताः प्रथमं = पूर्वम् मुकुलानि = कुड्मलानि यासु तास्ताः जग्ध्वा = भक्षयित्वा अरण्येषु उर्व्याः = भूमेः अधिकसुरभिम् = अतिघ्राणतर्पणं गन्धं च = सुरभिं च आघ्राय सारङ्गजाः = मतङ्गा भृङ्गा वा ते = तव मार्गं = पन्थानं सूचयिष्यन्ति।

Sri Vidyabharati Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

अत्र सारंगपदे श्लेषः । मन्दाक्रान्ता वृत्तम् ।

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा ।
तीरोपान्तस्तनितसुभगं यास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥१७॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र रामगिरितो मालदेशम्, ततः आम्रकूटपर्वतम् ततो विन्ध्यपादे रेवादर्शनम् ततश्च दशार्णदेशम्, ततश्च विदिशानाम्नी राजधानी यास्यसीति परामृशति यक्षो मेघम्—

अन्वयः—दिक्षु प्रथितविदिशालक्षणां तेषां राजधानीं गत्वा सद्यः कामुकत्वस्य अविकलं फलं लब्ध्वा यस्मात् वेत्रवत्याः स्वादुचलोर्मि पयः सभ्रूभङ्गं मुखमिव तटोपान्तस्तनितसुभगं पास्यसि ।

व्याख्या—दिक्षु = दिग्भागेषु प्रथितम् = विख्यातं विदिशेति लक्षणं नाम यस्याः सा तां राजधानीं गत्वा = प्राप्य सद्यः = तत्क्षणम् कामुकत्वस्य = कामुकतायाः अविकलम् = सम्पूर्णम् फलं = प्रयोजनं लब्ध्वा = प्राप्य यस्मात् = कारणात् वेत्रवत्याः = वेत्रवत्याः नद्याः स्वादु = मधुरम् चला ऊर्मयो यस्य तच्चलोर्मि = तरङ्गितः पयः = जलम् सभ्रूभङ्गम् = भ्रूकुटि युक्तम् मुखमिव = आधारमिव इत्यर्थः तीरोपान्ते = तटप्रान्ते = यस्तनितं = गर्जितम् तेन सुभगम् = सुन्दरम् यथा स्यात् तथा पास्यसि । कामिनामधरस्य आस्वादः सुखाद् अतिरिच्यते इति भावः ।

अत्र वेत्रवत्यां नायिकाव्यवहारस्य मेघे च नायकव्यवहारस्य समारोपात्समासोक्तिः —'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः' इति लक्षणात् ।

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो सा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥१८॥

CC-O. In Public Domain. Digitized by Sri Vidyabharathi Book Centre, Sringeri

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

CC-O. In Public Domain. Digitized by eGangotri

प्रसंगः—प्रसङ्गेऽस्मिन् स्वामिनः कुबेरस्य शापादस्तंगमितमहिमा यक्षो रामगिर्याश्रमस्थः स्वप्रियां सन्देशं नेतुं मेघं प्रार्थयन् अलकां गन्तुं मार्गं निर्दिशन् मार्गस्य वक्रत्वेऽपि उज्जयिनीमवश्यमेव गन्तुं परामृशति—

अन्वयः—उत्तराशां प्रस्थितस्य भवतः पन्थाः यदपि वक्रः (स्यात् तदपि) उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखो मा स्म भूः। तत्र पौराङ्गनानां विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः लोचनैः (यदि) न रमसे (तदा) वञ्चितः असि।

व्याख्या—उत्तराशां = उत्तरां दिशं प्रति प्रस्थितस्य = कृतप्रस्थानस्य भवतः पन्था उज्जयिनीमार्गो यदपि = यद्यपि वक्रः = तिर्यक्तया दीर्घः स्यात् तथापि उज्जयिन्याः विशालनगरस्य सौधोत्सङ्गप्रणयविमुखो = धवलगृहपराङ्मुखो मा स्म भूः = न भवेरित्यर्थः तत्र = उज्जयिन्यां पौराङ्गनानां = नागरनारीणां विद्युद्दामस्फुरितचकितैः = सौदामिनीमालादीप्तिचञ्चलैः लोलापाङ्गैः = लोलाश्चञ्चलाः अपाङ्गाः = नेत्रान्ताः कटाक्षा येषु तानि तैः लोचनैः = नयनैः यदि न रमसे न क्रीडसि तथा वञ्चितोऽसि = प्रतारितोऽसि। जन्मवैफल्यं भवेदित्यर्थः।

अत्र पूर्वार्धम्प्रत्युत्तरार्धस्य हेतुत्त्वात्काव्यलिङ्गम्। 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गम् निगद्यते इति लक्षणात्। मन्दाक्रान्ता वृत्तम्।

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥१९॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसंगः—द्रष्टव्यं श्लोक संख्या १८। अत्रोज्जयिन्या; विशेषतां वर्णयन् शिप्रावैशिष्ट्यं वर्णयति यक्षः।

अन्वयः—यत्र प्रत्यूषेषु सारसानां पटु मदकलं कूजितं दीर्घीकुर्वन् स्फुटितकमलामोदमैत्रीकषायः अङ्गानुकूलः शिप्रावातः प्रार्थनाचाटुकारः प्रियतमः इव स्त्रीणां सुरतग्लानिं हरति।

Sri Vidyabharathi Book Centre, Sringeri

व्याख्या—यत्र = यस्यां उज्जयिन्यां प्रत्यूषेषु = अहर्मुखेषु पटु = प्रस्फुटम् मदकलं = मदेन अव्यक्तं मधुरम् कूजितंशब्दं दीर्घीकुर्वन् = विस्तारयन्नित्यर्थः स्फुटि-

CC-O. In Public Domain. Digitized by eGangotri

तानाम् = विकसितानां कमलानां = वारिजानां आमोदो = जनमनोहरो गन्धस्तस्य मैत्री = सम्पर्कस्तेन कषायः सुरभिः = सुगन्धि, अङ्गानुकूलः = गात्रसुखस्पर्शः अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहन इत्यर्थः शिप्रा = काचित् तत्रत्या नदी तस्या वातः शिप्रावातः शिप्राग्रहणं शैत्यद्योतनार्थम् प्रार्थना = सुरतस्य याञ्चा तत्र चाटुकरोति इति तथोक्तः पुनः सुरतार्थं प्रियवचनप्रयोक्तेत्यर्थः प्रियतमः = वल्लभ इव स्त्रीणां सुरतग्लानिं = सम्भोगखेदं हरति = नुदति। चाटुक्तिभिर्विस्मृतपूर्वरतिरवेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्तीति भावः

अत्र शिप्रावातस्य प्रियतमेन सादृश्यवर्णनादुपमा अलङ्कार; मन्दाक्रान्ता वृत्तम्।

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः
रत्नच्छायाखचितबलिभिश्चामरैः क्लान्तहस्ताः।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-
नाभोक्ष्यन्ते त्वयि मधुकरश्रेणि दीर्घान्कटाक्षान् ॥ २० ॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसंगः—द्रष्टव्यं श्लो० १८। अत्रोज्जयिनीवर्णनप्रसङ्गे तत्रयानां वेश्यानां वैशिष्ट्यं वर्णयति यक्षः।

अन्वयः—तत्र पादन्यासैः क्वणितरशनाः लीलावधूतैः रत्नच्छायाखचितबलिभिः चामरैः क्लान्तहस्ताः वेश्याः त्वत्तः नखपदसुखान् वर्षाग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आभोक्ष्यन्ते।

व्याख्या—तत्र = सन्ध्याकाले पादन्यासैः = चरणनिक्षेपैः नृत्याङ्गैः क्वणिताः = शब्दायमाना रशना यासां ताः तथोक्ताः लीलया = विलासेन अवधूतैः = कम्पितैः रत्नच्छायया = मणिदीप्त्या खचिता = रुचिता बलयश्चामरदण्डा येषां तैः चामरैः = वालव्यजनैः क्लान्तौ = पीडितौ हस्तौ = बाहू यासां ताः एतेन देशिकं नृत्यं सूचितम् वेश्याः = गणिकाः महाकालनाथमुपेत्यन्तिः त्वत्तो नखपदेषु = नखक्षतेषु सुखान् = सुखकरान् वर्षाग्रे बिन्दून् = प्रावृट्प्रथमबिप्रुषः प्राप्य त्वयि मधुकरश्रेणिदीर्घान् = भ्रमरपंक्तिदीर्घान् लम्बमानित्यर्थः, कटाक्षान् = वक्रावलोकितानि आभोक्ष्यन्ते = त्यक्ष्यन्तीति।

Sri Vidyabharathi Book Publishing Trust

CC-O. In Public Domain. Digitized by eGangotri

अत्र चतुर्थपादं प्रति तृतीयस्य हेतुत्वाद् काव्यलिङ्गमलङ्कारः–'द्वयोर्वाक्यपदार्थत्वे काव्यलिङ्गम् निगद्यते' इति लक्षणात्। मन्दाक्रान्ता वृत्तम्।

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मास्मभूर्विक्लवास्ताः ॥ २१ ॥

सन्दर्भ—द्रष्टव्यं श्लो० १।

प्रसंग—द्रष्टव्यं श्लो० १८ तथा २०।

अन्वयः—तत्र नक्तं रमणवसतिं गच्छन्तीनां योषितां सूचिभेद्यैः तमोभिः रुद्धालोके नरपतिपथे कनकनिकषस्निग्धया सौदामिन्या उर्वीं दर्शय तोयोत्सर्गस्तनितमुखरः च मा भूः ताः विक्लवाः स्युः इति।

व्याख्या—तत्र = उज्जयिन्यां नक्तं = रात्रौ रमणवसतिं = प्रियभवनं प्रति गच्छन्तीनां = व्रजन्तीनां योषितां = अभिसारिकाणामित्यर्थः सूचिभेद्यैः = निविडैः तमोभिः = अन्धकारैः रुद्धालोके = निरुद्धदृष्टिसारे नरपतिपथे = राजमार्गे कनकस्य = सुवर्णस्य निकषो निकष्यत इति व्युत्पत्त्या निकषः = उपलगतरेखा तद्वत् स्निग्धं तेजो यस्यास्तया सौदामिन्या = विद्युत्प्रकाशेन उर्वी = पृथ्वी मार्गमिति यावत् दर्शय = प्रदर्शय किं च तोयोत्सर्गस्तनिताभ्यां = वृष्टिगर्जिताभ्यां मुखरः = शब्दायमानो मा स्म भूः गर्जनं कृथाः यतो हि ताः योषितः = नायिकाः विक्लवाः = भीरवः कृपया गर्जनं श्रुत्वा ताः भीताः स्युरिति भावः।

अत्र मेघमुखरता योषितां विक्लवत्वे कारणमिति काव्यलिंगम्। मन्दाक्रान्ता वृत्तम्।

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्
मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ २२ ॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसंगः—अत्र पूर्वमिरिोक्तां मार्गं सार्थवाहस्तावे यक्षो मेघं गम्भीरां नदीं वर्णयति।

Sri Vidyabharathi Book Centre, Shringeri

CC-O: In Public Domain. Digitized by eGangotri

अन्वयः—गम्भीरायाः सरितः प्रसन्ने चेतसि इव पयसि प्रकृतिसुभगः ते छायात्मा अपि प्रवेशं लप्स्यते, तस्मात् त्वम् अस्याः कुमुदविशदानि चटुलशफरोद्वर्तनप्रेक्षितानि धैर्यात् मोघी कर्तुं न अर्हसि ।

व्याख्या—गम्भीरानाम्न्याः सरितोः = नद्याः प्रसन्ने = अतिनिर्मले चेतसीव मनसीव पयसि = जले प्रकृत्या = स्वभावेनैव सुभगः = सुन्दरः ते = तव छायात्मापि = प्रतिबिम्बमपि प्रवेशं लप्स्यते = प्राप्स्यति तस्मात् कारणात् अस्याः = नद्याः कुमुदविशदानि = निर्मलानि चटुलाः = चंचलाः ये शफराः = मत्स्यविशेषाः तेषां उद्वर्तनान्येव = उल्लुण्ठानान्येव = प्रेक्षितानि = विलोकितानि मोघी कर्तुं = निष्फलानि विधातुं नार्हसि = न योग्यो भवसि ।

अत्र गम्भीरायाः प्रसन्नस्य जलस्य प्रसन्नेन चेतसा साधर्म्यवर्णनादुपमा । चटुलशफरोद्वर्तने प्रेक्षणस्यारोपाद्रूपकम् । मन्दाक्रान्ता वृत्तम् ।

तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥२३॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—द्रष्टव्यं श्लो २२ ।

अन्वयः—सखे ! प्राप्तवानीरशाखं किञ्चित्करधृतम् इव मुक्तरोधोनितम्बं नीलं तस्याः सलिलवसनं हृत्वा लम्बमानस्य ते प्रस्थानं कथमपि भावि ज्ञातास्वादः कः विवृतजघनां विहातुं समर्थः ।

व्याख्या—भोः सखे मेघः ! प्राप्तवानीरशाखं प्राप्ता वानीराणां = वेतसानां शाखा = विटपाः येन तत्तथोक्तम् अत एव किञ्चित् = इषत् करधृतम् हस्तावलम्बितम् इव स्थितम् मुक्तः = त्यक्तः रोधः = तटमेव नितम्बः = कटिर्येन तत्तथोक्तम् नीलं = कृष्णवर्णं तस्याः = गम्भीरायाः सलिलवसनम् = सलिलमेव वसनम् हृत्वा = अपनीय लम्बमानस्य = पीतसलिलभरालम्बमानस्य अन्यत्र जघनाच्छादनं ते = तव प्रस्थानं = प्रयाणं कथमपि = कृच्छ्रेण भावि = भविष्यति यतो हि ज्ञातास्वादः = अनुभूतविनितासंभोगसुखैः कः = पुमान् विवृतं =

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रकटीकृतं जघनं = कटिः तत् पूर्वभागो वा यस्याः ताम् विहातुं = त्यक्तुं समर्थः न कोऽपि इत्यर्थः ।

अत्र 'करधृतमिव' इत्यत्रोत्प्रेक्षा प्राप्तवानीरशाखस्य करधृतत्वेन सम्भावनात् । सलिले वसनस्यारोपाद्रूपकम्—'रूपकं रूपितारोपो विषये निरुपह्नवे' इति लक्षणात् चतुर्थपादरूपसामान्येन विशेषसमर्थनात् अर्थान्तरन्यासः । मन्दाक्रान्ता वृत्तम् ।

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ।।२४।।

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र मार्गवर्णनप्रस्तावे नीचैर्नामकं पर्वतं गन्तुं तत्र च स्कन्दस्य पूजां विधातुं यक्षो मेघं परामृशति ।

अन्वयः—पुष्पमेघीकृतात्मा भवान् व्योमगङ्गाजलार्द्रैः पुष्पासारैः तत्र नियतवसतिं स्कन्दं स्नपयतु हि तत् वासवीनां चमूनां रक्षाहेतोः नवशशिभृता हुतवहमुखे संभृतम् अत्यादित्यं तेजः ।

व्याख्या—पुष्पमेघीकृतात्मा = कामरूपत्वात् पुष्पवर्षकमेघीकृतविग्रहः भवान् व्योमगंगाजलार्दैः = व्योम्नि = आकाशे या गंगा तस्याः जलं तेन आर्दैः तैः पुष्पसारैः पुष्पाण्येव आसाराः = धारासम्पाताः तैः तत्र = देवगिरौ नियता वसतिर्यस्य तम् स्कन्दं = कुमारं स्वामिनं स्नपयतु = अभिषिञ्चतु हि = यतः तद् = भगवान् स्कन्दः वासवस्येमा वासव्यः तासां वासवीनां = ऐन्द्रीणां चमूनां सेनानां रक्षाहेतो = रक्षा विधातुं नवशशिभृता = भगवता चन्द्रशेखरेण बहतीति वहः हुतस्य वहो हुतवहो = वह्निः तस्य मुख्ये संभृतं = संचितम् अत्यादित्यं = सूर्यमप्यतिक्रान्त्य वर्तमानम् तेजो साक्षाद्भगवतो हरस्येव मूर्त्यन्तरमित्यर्थः ।

अत्र पूर्वार्द्ध प्रत्युत्तरार्द्धस्य हेतुत्वात् काव्यलिंगम् हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । मन्दाक्रान्ताच्छन्दः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥२५॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—प्रसङ्गेऽत्र मार्गवर्णनप्रस्तावे यक्षः चर्मण्वतीं नदीं वर्णयति तथा च तत्र नद्यां जलमादातुं मेघेऽवनते सति तस्याः समधिकां शोभां वर्णयति ।

अन्वयः—गगनगतयः शार्ङ्गिणः वर्णचौरे त्वयि जलम् आदातुम् अवनते पृथुम् अपि दूरभावात् तनुं तस्याः सिन्धोः प्रवाहम् एकं स्थूलमध्येन्द्रनीलं भुवः मुक्तागुणम् इव नूनं दृष्टीः आवर्ज्य प्रेक्षिष्यन्ते ।

व्याख्याः—गगने गतिर्येषां ते गगनगतयः = खेचराः सिद्धगन्धर्वादयः शार्ङ्गिणः = कृष्णस्य वर्णस्य कान्तेश्चौरे = अपहारके तत्तुल्यवर्णे इत्यर्थः त्वयि = मेघे जलम् = नीरम् आदातुम् = ग्रहीतुं अवनते = लम्बमाने सति पृथु = स्थूलमपि दूरत्वात् तनुं = सूक्ष्मतया प्रतीयमानं तस्याः = सिन्धोः चर्मण्वत्याख्याः प्रवाहम् = वेगम् एकं स्थूलो = महान् मध्यो मध्यमणीभूत इन्द्रनीलो यस्य तं भुवो = भूमेः मुक्तागणं मुक्ताहारमिव नूनं = निश्चयं दृष्टिः आर्वज्य = वक्रीकृत्य प्रेक्षिष्यन्ते = विलोकयिष्यन्ति ।

अत्र शार्ङ्गिणो वर्णचौरे इत्यत्रोपमा मेघस्य शार्ङ्गिणा सादृश्यप्रतिपादनात् चर्मण्वत्याश्च मुक्तागुणत्वेन मेघस्य स्थूलमध्येन्द्रनीलमणित्वेन सम्भावनयोत्प्रेक्षा । मन्दाक्रान्ता वृत्तम ।

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसिच्छाययाऽसौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥२६॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र यक्षो मेघं मार्गं वर्णयन् हिमालयं तत्र स्थितां गंगां च वर्णयन् उपरि उपरि गच्छति मेघे तच्छ्यामच्छायया अप्रयागे एव यमुनासङ्गमशोभां धारयिष्यति इति वर्णयति ।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
Siddhanta eGangotri Gyaan Kosha
Sri Jagadguru Shankaracharya Granthavali Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—सुरगज इव व्योम्नि पश्चार्धलम्बी त्वं चेत् तस्याः अच्छस्फटिक-विशदम् अम्भः तिर्यक् पातुं तर्कयेः, असौ सपदि लोतसि संसर्पन्त्या भवतः छायया अस्थानोपगतयमुनासङ्गमा इव अभिरामा स्यात् ।

व्याख्या—सुरगज इव = कश्चिद् दिग्गज इव व्योम्नि = आकाशे पश्चा-दर्धं = पश्चार्धम् पश्चिमार्धम् इत्यर्थः तेन लम्बित इति पश्चार्धलम्बी सन् पश्चार्धभागेन व्योम्नि स्थित्वा पूर्वार्धेन जलोन्मुख इत्यर्थः, अच्छस्फटिकविशदं = निर्मलस्फटिकावदातं, तस्याः गङ्गायाः अम्भः तिर्यक् तिरश्चीनं यथा स्यात् तथा पातुं त्वं तर्कयेः = विचारयेश्चेत् असौ सपदि = शीघ्रम् लोतसि प्रवाहे संसर्पन्त्या = संक्रमन्त्या भवतः छायया प्रतिबिम्बेनासौ गंगा अस्थाने = प्रयाग-व्यतिरिक्ते स्थाने उपगतः = प्राप्तः यमुनासंगमो यया सा सेवाभिरामा = मनोज्ञाय स्यात् ।

अत्र मेघस्य सुरगणत्वेन सम्भावनादुत्प्रेक्षा—'भवेत्सम्भावनोत्प्रेक्षा प्रकृत-स्य परात्मना' इति लक्षणात् । मेघच्छायया गङ्गाया अस्थाने यमुना सङ्गम-स्यच संभावनादुत्प्रेक्षा । मन्दाक्रान्तावृत्तम् ।

हेमाम्भोज प्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन्कल्पद्रुमकिसलयान्यंशकानीव वातैः—
नानाचेष्टैर्जलद ! ललितैर्निर्विशेस्तं नगेन्द्रम् ॥२८॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र हिमालयतः क्रौञ्चमार्गेण मानसरोवरं गन्तुं तज्जलं पिबन् ततश्च कैलासपर्वतं गन्तुं परामृशति यक्षो मेघम्—

अन्वयः—हे जलद ! हेमाम्भोजप्रसवि मानसस्य सलिलम् आददान ऐरा-वतस्य क्षणमुखपटप्रीतिं कुर्वन् कल्पद्रुमकिसलयानि अंशुकानि इव वातैः धुन्वन् नानाचेष्टैः ललितैः तं नगेन्द्रं कामं निर्विशेः ।

व्याख्या—हे जलद = भो मेघ ! हेम्नो जातानां अम्भोजानां स्वर्णक-मलानां प्रसवि = जनकम् अस्य मानसस्य = मानससरोवरविशेषस्य सलिलम् = जलं आददानः पिबन्नित्यर्थः, ऐरावतस्य = गजस्य क्षणम् = मुहूर्तं मुखपटप्रीतिं = मुखावगुण्ठनवस्त्रलाभप्रीतिं कुर्वन् = जनयन् कल्पद्रुमाणां सुरवृक्षाणां किसलयानि

CC-O. Vasudeva Bharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पल्लवभूतानि अंशुकानि = सूक्ष्मवस्त्राणि इव = यथा वातैः मेघवातैः धुन्वन्नाना = बहुविधाः आवेष्टास्तोयपातादयो येषु तैर्ललितैः = क्रीडितैः तं नगेन्द्रं = कैलासं कामं ययेष्टं निविशेः = समुपभुङ्क्ष्व । यथा कोऽपि सखा मित्रालयं गत्वा-तत्सम्बन्धीनि दीर्घिकावाहनारामप्रभृतीनि यथाकामं निविशति तद्वदिति ध्वनिः ।

अत्र कल्पद्रुमकिसलयानामंशुकैः साम्यवर्णदादुपमाऽलङ्कारः । मन्दाक्रान्ता वृत्तम् ।

तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनी आम्रवृन्दम् ॥२८॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसङ्गः—तस्य हिमालयस्य कैलासस्य वा उत्संगेऽलका नाम नगरी यक्षेश्वराणां वसतिः अस्ति यत्र मे प्रिया वर्तते इति मेघं वर्णयति यक्षः ।

अन्वयः—कामचारिन् प्रणयिनः इव तस्या उत्संगे, स्रस्तगङ्गादुकूलाम् अलकां दृष्ट्वा त्वं पुनः न ज्ञास्यसे (इति) न, उच्चैर्विमाना या वः काले सलिलोद्गारम् अम्रवृन्दं कामिनी मुक्ताजालग्रथितम् अलकम् इव वहति ।

व्याख्या—भोः कामचारिन् = जलद प्रणयिन् = भर्तुः इव = यथा तस्य = कैलासस्य उत्संगे = उपरि शृङ्गे, स्रस्तं = भ्रष्टं गङ्गा एव दुकूलं = वस्त्रं यस्या-स्ताम् अलकां = कुबेरनगरीं दृष्ट्वा त्वं तु न ज्ञास्यसि इति न किन्तु ज्ञास्यसि एव इत्यर्थः, उच्चैः = उन्नतानि विमानानि = सप्तभूमिकभवनानि यस्यां सा मेघसंवाहनस्थानसूचनार्थमिदं विशेषणम् अन्यत्र विमाना निष्कोपा, या = अलका वः = युष्माकम् काले मेघकाल इत्यर्थः, सलिलमुद्गिरतीति सलिलोद्गारम् स्रवत्सलिलधारमित्यर्थः, अम्रवृन्दम् = मेघकदम्बम् कामिनी = स्त्री मुक्ता-जालैः = मौक्तिकसरैः ग्रथितम् = प्रत्युप्तम् अलकमिव = चूर्णकुन्तलानीव वहति = बिभर्ति । कैलासस्योत्तुङ्गशिखरस्थितत्वेन मेघाधीनपतिकालयना-यिकात्वं ध्वन्यते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अत्र गङ्गायां दुकूलस्यारोपाद् रूपकम्। हिमालयस्योत्संगे वर्तमानायाः अलकायाः कस्यचित् प्रणयिनः उत्संगे वर्तमानया नायिकया सादृश्यवर्णनादुपमेति रूपकोपमयोः संसृष्टिः। मन्दाक्रान्ता वृत्तम्।

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥२९॥

सन्दर्भः—द्रष्टव्यं श्लो० १।

प्रसंगः—प्रसंगेऽत्र यक्षो मेघं कथयति यत् यदा त्वमाकाशमार्गतो गमिष्यसि तदा विरहिण्यो नायिकाः त्वामवश्यमेव प्रेक्षिष्यन्ते यतो हि तव दर्शनेन तासां मनसि विश्वासो भविष्यति यन्मे प्रियः समागमिष्यतीति।

अन्वयः—पवनपदवीम् आरूढं त्वाम् उद्गृहीतालकान्ताः प्रत्ययात् आश्वसन्त्यः पथिकवनिताः प्रेक्षिष्यन्ते। त्वयि सन्नद्धे विरहविधुरां जायां कः उपेक्षेत् अन्यः जनः न यः अहम् इव पराधीनवृत्तिः स्यात्।

व्याख्या—पवनस्य = वायोः पदवीं = मार्गम् आकशमिति यावत् आरूढम् = उपस्थितम् आकाशमार्गेण गच्छन्तमिति भावः त्वां = मेघम् उद्गृहीतः = उपरि कृत्वा धृतः अलकानां = केशानाम् अन्तः = अन्तभागो याभिस्ता प्रत्ययात् = विश्वासात् मेघं दृष्ट्वा मे प्रियः समागमिष्यतीति विश्वासात् पथिकानां = वियोगिनां वनिताः = नायिकाः विरहिण्यः इति भावः प्रेक्षिष्यन्ते = अवलोकयिष्यन्ति। त्वयि = मेघे सन्नद्धे = आकाशमारूढे सति विरहेण = वियोगेन विधुरां = पीडितां जायां = पत्नीं कः उपेक्षेत् = उपेक्षां कुर्यात्। अन्यः = मद्तिरिक्तः जनः = व्यक्तिः न = नास्ति यः अहमिव = अहं यथा पराधीना = परतन्त्रा वृत्तिः = जीविका यस्य स एवंभूतः स्यात् = भवेत्।

अत्र पूर्वार्द्धे काव्यलिङ्गम्, पथिकवनिताभिः मेघप्रेक्षणे प्रत्ययादीनां हेतुत्वात्। तृतीयपादेन सामान्येन विशेषस्य समर्थनादर्थान्तरन्यासः। मन्दाक्रान्ता वृत्तम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामबन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्कः ।
आ कैलासाद् विसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥३०॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र यक्षो मेघं कथयति यत् ते गर्जनं श्रुत्वा राजहंसाः मानसरोवरं गन्तुमुद्यताः भविष्यन्ति तथा मानसं यावत्ते मार्गदर्शकाःसहयोगिनः भविष्यन्ति ।

अन्वयः—यत् महीम् उच्छिलीन्ध्राम् अबन्ध्यां कर्तुं प्रभवति तत् ते श्रवणसुभगं गर्जितं श्रुत्वा मानसोत्काः विसकिसलयच्छेदपाथेयवन्तः राजहंसाः आकैलासात् नभसि भवतः सहायाः सम्पत्स्यन्ते ।

व्याख्या—यत् = भवतां गर्जनं महीम् = पृथिवीम् उच्छिलीन्ध्रा = उत्पन्नशिलीन्ध्रध्वजाम् अतएव अबन्ध्यां = वन्ध्यात्वरहितां कन्दलीयुक्तामिति कर्तुं = विधातुं प्रभवति = समर्थो भवति तत् ते = तव श्रवणयोः = श्रोत्रयोः सुभगं = सुखकरं गर्जितं = गर्जनं श्रुत्वा = आकर्ण्य मानसाय = मानसं गन्तुम् उत्काः = उत्कण्ठा येषां ते मानसोत्काः तथा च विसानां = कमलनालानां किसलयानां = नवपल्लवानां च छेदैः = खण्डैः पाथेयवन्तः = मार्गव्ययुक्ताः सन्तः राजहंसाः = पक्षिविशेषाः आकैलासात् = कैलासं यावत् नभसि = आकाशे भवतः = मेघस्य सहायाः = सहायकाः मार्गदर्शकाः सम्पत्स्यन्ते = भविष्यन्तीति भावः । मन्दाक्रान्ता वृत्तम् ।

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ ३१ ॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

Sri Vidyabharathi Book Centre, Sringeri

प्रसंगः—अत्र मार्गवर्णनप्रस्तावे यक्षो मेघं मध्यमार्गे वर्तमानानां निर्विन्ध्यां नदीं वर्णयति ।

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—पथि वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः निर्विन्ध्यायाः रसाभ्यन्तरः सन्निपत्य भव हि स्त्रीणां विभ्रमः प्रियेषु वाद्यं प्रणयवचनम् ।

व्याख्या—पथिः मार्गे वीचीनां = तरङ्गाणां क्षोभेण = सञ्चलनेन स्तनितानां कूजतां विहगानां = पक्षिणां श्रेणीः = पंक्तिः एव काञ्चीगुणः = रशनाबन्धनं यस्याः तस्याः संसर्पन्त्या = शनैः प्रवहमानायाः स्खलितेन = वस्त्रसंस्खलनेन सुभगं = रमणीयं यथा स्यात्तथा दर्शिता = प्रकटिता आवर्ताः = जलभ्रमिविशेषा एव नाभिः = यस्यास्तस्याः निर्विन्ध्यायाः = तन्नाम्न्याः नद्याः रसाभ्यन्तरः = जलमध्ये सन्निपत्य = प्रविश्य भव = स्थितो भव हि = यतः स्त्रीणां = नायिकानां विभ्रमः = विलासः प्रियेषु = नायकेषु आद्यं = प्रथमं प्रणयवचनं = प्रेमयाचनं भवति ।

अत्र विहगश्रेणीकाञ्चीगुणस्य आवर्तें नाभेश्चारोपाद्रूपकम् । चतुर्थपादेन सामान्येन विशेषस्य समर्थनादर्थान्तरन्यासः । मन्दाक्रान्ता वृत्तम् ।

अप्यन्यस्मिञ्जलधर ! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन्सन्ध्याबलिपटहतां शूलिनः श्लाघनीया
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३२ ॥

सन्दर्भः—द्रष्टव्य श्लो० १ ।

प्रसंगः—अत्र यक्षो मेघमवश्यमेवोज्जयिनीं गन्तुं परामृश्य तत्र सायंकालं यावत् स्थातुं तथा च भगवतो महाकालेश्वरस्य सायंकालिकपूजायां सम्मिलितं भवितुं परामृशति—

अन्वयः—हे जलधर ! अन्यस्मिन् अपि काले महाकालम् आसाद्य यावत् भानुः ते नयनविषयम् अत्येति (तावत्) स्थातव्यम् शूलिनः श्लाघनीयां सन्ध्याबलिपटहतां कुर्वन् आमन्द्राणां गर्जितानाम् अविकलं फलम् लप्स्यसे ।

व्याख्या—हे जलधर = मेघ ! अन्यस्मिन् = सायंकालभिन्ने अपि काले = समये महाकालं = महाकालेश्वरम् आसाद्य = प्राप्य यावत् भानुः = सूर्यः ते नयनविषयं = दृष्टिगोचरताम् अत्येति = याति तावत्तत्र त्वया स्थातव्यं = निवासः कर्त्तव्यः यतो हि शूलिनः भगवतो महाकालेश्वरस्य श्लाघनीयां = प्रशंसनीयां

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

सन्ध्याबलिः = सायंकालिकी पूजा तत्र पटहतां = पटहकर्मतां पटहध्वनिवद् ध्वनिरिति यावत् कुर्वन् आमन्द्राणां = गम्भीराणां गर्जितानां = गर्जितानाम् अविकलं = सम्पूर्णं फलं लप्स्यसे = प्राप्स्यसि ।

अत्र चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात्काव्यलिङ्गमलङ्कारः—'हेतोर्वाक्य-पदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । मन्दाक्रान्ता वृत्तम् ।

तां कस्याञ्चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥३३॥

सन्दर्भः—द्रष्टव्यं श्लो० १ ।

प्रसंगः—अत्र यक्षः उज्जयिनीं गत्वा तत्र रात्रौ निवासं कर्तुं पुनश्च प्रभाते प्रस्थातुं परामृशति मेघम् ।

अन्वयः—चिरविलसनात् खिन्नविद्युत्कलत्रः भवान् सुप्तपारावतायां कस्याञ्चित् भवनवलभौ तां रात्रिं नीत्वा पुनरपि सूर्ये दृष्टे अध्वशेषं वाहयेत्, सुहृदाम् अभ्युपेतार्थकृत्याः न खलु मन्दायन्ते ।

व्याख्या—चिरं = बहुकालं विलसनात् = स्फुरणात् खिन्नं = श्रान्तं विद्युत् = सौदामिनी एव कलत्रं = पत्नी यस्य सः भवान् = मेघः सुप्ताः = शयनं गताः पारावताः = कपोताः यस्यां तस्यां कस्याञ्चित् भवनस्य = प्रासादस्य वलभौ = कुड्यां तां रात्रिं = रजनीं नीत्वा = अतिवाह्य पुनरपि सूर्ये दृष्टे = प्रातःकाले शेषम् = अवशिष्टम् अध्वं = मार्गमतिवाहयेत् = यापयेः सुहृदं = मित्राणाम् अभ्युपेतार्थकृत्याः = स्वीकृतक्रियाः न खलु मन्दायन्ते = मन्दा न भवन्तीति ।

अत्र सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासः मन्दाक्रान्ता वृत्तम् ।

ब्रह्मावर्तं जनपदमथ स्वां भाहसानः
क्षेत्रं क्षत्रप्रघनपिशुनं कौरवं तद्भजेथाः ।
राज्यन्यानां सितशरशतैर्यत्र गाण्डीवधन्वा
धारापातस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥३४॥

Sri Vidyabharathi Book Centre, Srinagar

सन्दर्भ—द्रष्टव्यं श्लो० १ ।

CC-O. In Public Domain. Digitized by eGangotri

प्रसंगः-अत्र यक्षो मेघं मार्गं वर्णयन प्रसङ्गे ब्रह्मावर्तजनपदं गन्तुं परामृशति ततश्च यत्र पुरा महाभारतं युद्धं जातं तत्र कुरुक्षेत्रं गन्तुं निर्दिशति कुरुक्षेत्रस्य वैशिष्ट्यं च प्रतिपादयति—

अन्वयः—अथ ब्रह्मावर्तं जनपदं छायया गाहमानः तत् क्षत्रप्रघनपिशुनं कौरवं क्षेत्रं भजेथाः यत्र गाण्डीवधन्वा धारापातैः त्वं कमलानि इव सितशरशतैः राजन्यानां मुखानि अभ्यवर्षत् ।

व्याख्या-अथ = दशार्णदेशगमनान्तरं ब्रह्मावर्तं नाम जनपदं = मण्डलं छायया = आतपरहितेन गाहमानः = प्रविशन् तत् क्षेत्रं = प्रसिद्धं क्षत्राणां = क्षत्रियाणां प्रघनं = विनाशस्तस्य विशुनं = सूचकं कौरवं क्षेत्रं = कुरुक्षेत्रं भजेथाः = यायाः यत्र गाण्डीवधन्वा = गाण्डीवधारी अर्जुनः, धारापातैः = जलवर्षणैः त्वं = मेघः कमलानि = सरोजानि इव सितशरशतैः = तीक्ष्णबाणसहस्रैः राजन्यानां = राजसमूहानां मुखानि = आननानि अभ्यवर्षत् वर्षयामास । बाणप्रहारेण शिरांसि कर्त्तयित्वा पातयामासेति भावः ।

अत्र चतुर्थपादे उपमा । मदक्रान्ता वृत्तम् ।

—०—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मूल्य 5-00

भारतीय विद्या प्रकाशन

वाराणसी • दिल्ली

Sri Vidyabharathi Book Centre, Sringeri